नं०: ५०१
काव्यप्रकाश:
पत्राणि १-६८

नं०: ५०१
काव्यप्रकाश:
पत्र सं०: १-६८

के०१९४

नं० ~~९९६~~
५०१

श्रचंगत न्यः पत्नागोलि
के व लं श्रद्कं लेख न भमा
श्र सिमन [illegible] कृतमलि
त पत्रच नतु क्कन्यः नना ले यनं
जगदी प्रसाद

१६८ पत्नागि

का॰ प्र॰ १

ॐ श्रीशंकरो जयति नमः शारदायै ॥ ॐ प्रणम्य शारदां काव्यप्रकाशो बोधसिद्धये पदार्थविवृतिर्नामाशितिकंठस्य दर्पणे
ग्रथ्यात्र शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाकलाविद्यारागकालनियति पुरुषप्रकृतिबुद्धिमनोहंकारश्रोत्रत्वक्चक्षुर्जिह्वा
घ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवायुवह्निसलिलभूमयः षट्त्रिंशत्तत्त्वानि वेद्यस्मिपतितानि संविद्
रूपं ममनिर्विघ्नं तदम्युपदेशाद्यो विद्यमुपचारेणेति सर्वथा यथैव द्यस्वतंत्रं तद्दहाविंशतानि सर्वत्रस्थितानि तथाहि देहे यत्काठिन्यं
तद्धरा १ यद्द्रवं तत्तोयः २ यदुष्मं तत्तेजः ३ यत्स्पन्दनं तन्मरुत् ४ यत्सावकाशं तन्नभः ५ तेषां तेषां च पंचसूक्ष्म
रूपत्वादनुद्भिन्नविभागा गंधरसरूपस्पर्शशब्दास्तन्मात्राणि १० तद्ग्राहकाणि पंचज्ञानेन्द्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्रा
णि स्वस्वव्यापारं कुर्वंति पंचकर्मेन्द्रियाणि देहव्यापकानि विशिष्टस्थानेषु स्फुटानि तद्यथा वाक्पाणिपादपायूपस्था
नि जल्पनग्रहणगमने उत्सर्गविसर्गआनंदेन स्वात्मानि विश्रमणं मिमेषाम सायायुणाथर्माः २० संकल्पकारि मनः २१
निश्चयकारिणी विकल्पमतिविवधारिणी बुद्धिः २२ एतावन्मात्र अभिमानकारी अहंकारः २३ एषां कारणं सत्त्वादि
गुणाः तेषां साम्यावस्था प्रधानं प्रकृतिः २४ तद्व्यतिरिक्तो भोक्ता पुरुषः २५ तस्यैक विदेव विषययोजनिका नियतिः
२६ योऽहं तत् भविष्यद्वर्तमानतया स्वस्वरूपं कलयन्भावानपि तथा कलयति सोऽसौ कालः २७ विशिष्टविषयासक्ति
जनको रागः २८ बुद्धितत्त्वनिविवितं च वस्तु यया प्रपश्यति सा सा विद्या २९ यया किंचित्कर्तुं समर्थो भवति सा
सा कला ३० इयन्तो वेद्यकल्पाय स्याद्यकारणं ॥ ॥ ॥ ॥ ॥ ॥ ॥

मायाा ३१ ययास्वपुरुषस्यस्वरूपंप्रकाशयितुंप्रारभ्यते साऽस्यशुद्धविद्या ३२ यस्यामवस्थायांस्फुटतेनात
थात्मानमभेदेनपश्यति अहमेवेदंपदार्थोऽइतिसास्येश्वरावस्था ३३ यस्यांततोतेवस्फुटीभूतान्नाहमेवेदंइति
अभेदेपिप्रथमानानिवपश्यतिसास्यसदाशिवदशा ३४ ययास्वस्वरूपैकभूतांस्तान्भावान्स्वरूपांसपत्रामपश्य
तिसास्यशक्त्यवस्थाअनाश्रितश्वस्वातिरुक्ता ३५ यस्यांस्वरूपमेवशुद्धंभातिसास्यशिवावस्था ३६ सा
मप्रमेयत्वेविश्रम्ययापरामृश्यतेसास्यसंविन्मयावस्थेतिशिवागमप्रसिद्ध्याषट्त्रिंशत्तत्त्वदोलान्दोलितसकलाभि
लपटलः प्रकटितसत्स्वरूपश्चिदानन्दघनः राजानककुलोत्तिलको मम्मटनामादेशिकवरोलौकिकसर्व
वस्वप्रकाशनेप्रवृत्तोपि आत्मतत्त्वेनतस्यपराविद्यात्वेनेतियोजयेत् उन्मनासातद्विलीनयामनःसंकल्पउन्मनेति सं
कल्पःक्रममतोत्तानमुन्मनेयुगपदभ्युदये तस्मात्साहिपराविद्यायस्मात्समानविद्यते विन्दतेह्यत्रयुगपत्सार्वज्ञ्यादि
गुणसमान् तत्रस्थांश्चजयेतेजःपरंपरमकारणं यस्मिल्लिनत्सविद्याकेतनस्थःशिवतांव्रजेत् इत्यादिश्रीस्वच्छ
न्दशास्त्रोक्तदृशाः तत्रपक्षिनपरिस्फुरितस्वच्छन्दप्रकाशादिशास्त्रपरिमर्जनसंविन्स्वरूपस्याभिनवस्यकाव्यस्याशि
वतत्त्वस्यप्रकाशिकामभेदप्रथांस्याभिकांशुद्धविद्यांप्रथममेवनायिकास्थानेअन्तर्ग्रहायदर्शयति ॐअथ्यारम्भेवि
घ्नविघातायसमुचितेष्टदेवतांग्रन्थकृत्परामृशति ग्रन्थस्यकाव्यप्रकाशापरनाम्नः शिवतत्त्वप्रकाशस्यारम्भेवि
कीर्णायाविश्रान्तस्वप्रकाशप्रतिबन्धकाःस्वस्वरूपाख्यातिभेदप्रथाकारणमायादयः पाशभूताः तेषांविघाताय
विशिष्टोज्ञानःपूर्णत्वस्मादादिसंतताभावः तदर्थंसमुचितामायानिरोधनायामोघवीर्यावामास्प्रष्ट्रीइच्छाशक्तिप्रथम

स्यन्दभूता वामादिदेवताः विश्वस्य वैचित्र्यवर्गस्य क्रोडाविजिगीषाद्भवहारस्यापतीभूता शुद्धविद्यान्तापरामृष्टेति शि-
ष्यानुग्रहार्थं सर्वं विकरोति ॐ नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम् नवरसरुचिरां निर्मिति-
मादधती भारती कवेर्जयति कवेः परामर्शात्मनः शिवभट्टारकस्यैव वागीशाख्यस्य स्वप्रतिभा भारती शुद्धविद्यास्व-
रूपा वागीशी जयति सर्वमेव मायादिक्षित्यन्तं तत्त्ववर्गमभेदप्रथोत्थापनेन स्वभावत्वेन कीदृशी निर्मिति-
मित्यपरलक्षणानात्मसर्गस्थितिसंहारान्मायादितत्त्ववर्गस्य प्रादधती धारयन्ती अथवा शिवस्यैव निर्मितिं सम्प-
रूपाख्यानमादधती पोषयन्ती निर्मितिं कथंभूतां नवेति नवानां वामादीनां शक्तीनां रसेनाभिलाषेण रुचिरां न-
था चोक्तं श्रीस्वच्छन्दे शुद्धविद्यान्तं वामादिभुवनं विचारे वामया सृजते विश्वं ज्येष्ठया पालयेत्ततः रौद्र्या लो-
कान्संहारं करोति स्वेच्छया प्रभुः काल्या कलयति भूतानि विकरिण्या क्रियेत्ततः बलमथन्या सर्वबलं स-
म्मति वामया दमन्या दमयित्वा तु मनः संकल्परूपकं नयते परमस्थानं तृप्तमनसा परमेश्वरः इति निर्मितिं पुनः
किंभूतामनन्यपरतन्त्रामिति न विद्यते ऽन्यः परं तत्त्वं भेदतत्त्वप्रकारो यस्याः तां मायायां हि शिवतत्त्वाभेदतत्त्वप्रकाराः शु-
द्धविद्यायां तु भेदप्रथोन्मीलनप्रथमसोपानकल्पायां नान्यत्किंचिद्विमर्शतन्त्रमित्यर्थः अथवा नान्यस्य कस्यचिन्मा-
यादितत्त्वस्याधीना सर्वोपरिवर्तित्वात् तथा चोक्तं तस्मात्सर्वाधिपा विद्या यस्मात्समा न विद्यते इति अनन्यपरतन्त्रां ह्ला-
दैकमयीं ह्लादेन परमानन्दस्वरूपेण शिवेनैकस्वरूपां सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः
अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य स्यैव गुणषट्कस्य प्रापणात् तथा चोक्तं विन्द्येत्सर्वगुणा

पत्वार्थस्यादिगुणमयत्वान्निमन्त्रविदन्त्वाने विह्वलाभेदेनेनयोर्द्वयोरेवविद्योतिप्रयोगइति तथैवनियतेति शुद्धवि
द्यातन्नेनियतिनन्नम्पदवीयस्मान्नकृतेनानियमेनसम्भवतीत्यर्थः इत्येवंरहस्योपदेशोपनिषद्गुरुयामंगलकारि
कयावहिर्मुखोलोकानप्यभिमुखीकृत्यवाच्यकमार्थमप्याह कवेः काव्यकर्तुः काव्यविवेचकस्य सहृदया
स्यवाभारतीवाक्सरस्वतीदेवताजयतिसर्वोत्कर्षेणवर्तते किंभूतानियतिनिर्माणंकाव्यस्यकरणमादधतीआ
यवानिर्मितिनियतिनिष्ठितनामितिप्रमाणस्यकृपयापरिच्छेदामादधतीपोषयन्तीनिर्मितिं कीदृशीं नवेति नवसंख्य
काः प्रसिद्धावारसाः शृङ्गारादयोयस्यांकाव्यार्थाभावनपदवीविराजमाणाया तथाअनन्तमीति अनन्यशब्दस्यार्थस्य
वाचनायत्ताशब्दार्थयोर्हिविभावाद्यभिधानपदवोपदेशेन रसत्वस्य स्वतः सिद्धः स्वप्रकाशानन्दरूपत्वात्तनदि
निवद्यमानत्वाम्नायैकरूपतातत्वाकार्यानवच्छेदाणामित्यर्थः अथवा विच्छेकादमस्यनपरतन्त्राकिंतुविवेचा
केनैवज्ञेयामितियावत् एवंह्लादयतिह्लादश्चमत्कारस्तद्रूपः एयमानन्दएवैकः शोकादिभिरमिश्रः प्रचुरोयस्याः
स्ताहृशीं अत्रहेतुगर्भविशेषणमाह नियमाकारणमहेशकार्येयति कार्यकारणभावनियमेनकृतोयाति
यमः लोकेहर्षकारणात्प्रियदर्शनादेर्हर्षो जायतेशोककारणात्मदर्शनादेःशोकएवेत्येवंरूपः तेनरहि
ता काव्येशोकादिकारणेभ्योपिहर्षस्यैवासत्वेः तथाबध्यतिकायादयः सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्
मयः वेद्यान्तरस्पर्शशून्योब्रह्मास्वादसहोदरः लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः स्वाकारवदभि
न्नत्वेनायमास्वाद्यतेरसः प्रतीयमानात्मपरत्वेग्राह्यैः सपदिङःखवत् करुणाद्यारसाः प्रात्तैः प्रोच्छाद्यतन्दत्त

का॰
टी॰
३
3

यासमस्ताः अलौकिकप्रभावं नीतेभ्यो रसनिलीलया सङ्क्रयावस्थं वितेभ्यः स्यात्समस्ततत्त्वमिति निस्थितिः सर्वत्र क
रणत्वस्मरसमैवोपपादनात् भवेद्रामायणादीनामसथाङ्ग वितन्ता तथ्यान्तराम पादाक्षेमकलोलवा
दिथिः श्रीमत्रामायणेतिसंसूत्रयाह्नमात्कथमित्यादि तथाचात्मेवसमानाग्रथ्याष्ठीबीजभूतायां कारिका
याकवलेकारसमरूपव्यपदेशेयोयत्र्व्यतिरेकमुक्तिनह्ययार्थमाह नियतिशक्त्यानियतरूपासवेडः वेमा
हसभावापरमाणवाद्युपादानकर्मादिसहकारिकारणपरतंत्राषट्रसानवह्यद्येवामते मैतादशीब्रह्मणेनिर्मि
तिर्निर्माणमेतद्धिलक्षणानन्दकविवाङ्गिमितिः अतएवजयतिजयमर्थेनवनमस्कारश्चाक्षिप्यते इत्येतोप्रसा
मिमप्रयाणनृपतिलभ्यते तद्धि पाकेषुनायामसदेवरङ्गेत्तैनिरूप्यते यस्मान्निरूपयस्य नियतिसन्नकथ्यते इसा
वशीवागमेकस्यान्नियतिनन्नमुपशक्त्यायर्मयमयोनियमस्यामर्थ्योनानियतेचेननाचेतन्यादिकेरूपयस्मात्ताहशी
अतएवसविस्मादि श्रीमर्थ्यातिविस्पादात्मकाप्रकाशाप्रहतिनियमार्थाः अस्त्येतामभिभवाश्रयजननमिथुन
हेतयन्त्रगुणाः स्त्रिमात्रिपशानसनात् प्रकृतिः त्रैगुण्येन सुखदुःखमोहस्वभावातथापरमाणवादिवतदुपादानेस
मवायिकारणं कर्मादिवतन्महकारिनिमित्तकारणं तयोः परतंत्राकार्यन्तयानियतपश्चात्ताविती षड्सेमादि
मधुरादिसषट्कयुतापितन्नसर्वेषामपिहृद्यविपर्ययीणिकत्वादिनावासानिकत्वादिनावाप्रकृतिभेदेनप्रमेकेभिन्न
रुचित्वात् सप्रसिद्धा एतादृशीमसमनेतरोक्तधर्मवतीब्रह्मणोनिर्मितिर्निर्माणंवतद्देशविधोभूतगणः नपुनः प
तस्याविलक्षणाविरुद्धलक्षणा कविवाचोनिर्मितिः तथाचजयतीति लभ्यते इत्येतेनवाक्येनलक्षणामूलगूढ॥ ७॥

३

येऽजनयानमस्कारात्मकं वस्तु ध्वन्यते इति केणह्यर्थकथनाद्यतिरेकालंकारो ध्वन्यः सर्वस्याः कारिकायाः वाक्यं
र्थीभूतं नमस्कुर्वभारतीति विधेयो रतिभावो ध्वन्यः इति विवरणकाराः गुरवस्तु मन्त्राद्यभिभावव्यतिरेकेण सधलिस्वनायामर्हः ।
किं तज्जयतीति पदद्योत्यो भारत्या निर्माणनिमित्तयोगितयोत्साहः प्रकृतिनियतादीरसमर्पितिरस्कृतिरस्मादृशः आ।
दिवाक्यप्रयोक्तृव्यमभिधेयप्रयोजने प्रतिपादयितुं श्रोतृप्रवाहोत्साहसिद्धये तेनिष्प्रयोजकमप्रसिद्धमादिवाक्यम
वतरणिका पूर्वं प्रयुङ्क्ते इहाभिधेयं सप्रयोजनमाह काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परनि।
र्वृतये कान्तासम्मिततयोपदेशयुजे अत्र काव्यमभिधेयं यशः प्रभृति प्रयोजनं ग्रन्थस्य यत्नस्य करणं ह्यात्र तस्मै तथा
विवहारस्यवित् ज्ञानं तस्मै कान्तया सम्मितं स्वल्पलक्षणावेनोपदेशस्य योजने युक् तस्मै सर्वत्रात्रैव चतुर्थ्यः अ
स्याः कारिकाया ह्यर्थमाह कालिदासादीनामिव यशः श्रीहर्षादेर्धावकादीनामिव धनं राजादिगतोचि
ताचारपरिज्ञानं आदित्यादेर्मयूरादीनामिवानर्थनिवारणं सकलप्रयोजनमौलिभूतं समनन्तरमेव रसास्वादनस
मुद्भूतं विगलितवेद्यान्तरमानन्दं प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्पुराणादीति
हासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकवि।
कर्म तत्कान्तेव सरसतापादनेनाभिमुखीकृत्य रामादिवद्वर्तितव्यं न रावणादिवदित्युपदेशं च यथायोगं कवेः स
हृदयस्य च करोतीति सर्वथा तत्र यतनीयं काव्यं केवलं कर्तुश्च पुनः पुनः सहृदयस्य सकलस्य श्रोतुरपि यशः।
करोति अनेन सम्प्रक्रियाकृते अनेन सम्प्रक्रिया ज्ञातमिति ख्यातिर्विधेया कवेः केषामिव कालिदासादीना।

भिवेमवलिंगासंख्याविभेदेपि उपमानोपमेययोरिति अभियुक्तस्मरणादेकवचनस्यापि बहुवचनेन सह ता विभक्तिपृथ
क्त्वेकैव उपमानोपमेययोरिति अभियुक्तस्मरणादेकवचनस्यापि बहुवचनेन समन्वयः अत्र कालिदासादीनां कवि
रूपेण सह हृदयेन वस्तुरूपमुक्तं राजादिनेति राजगृहप्रभृतिसमीपकथ्यवर्तिनं कथ्यातिवर्तिनस्वामित्यवबु
पदेशोचितनयाचारसकलप्रयोजनपरिज्ञाने सकलप्रयोजनेति धर्मार्थकाममोक्षप्रयोजनानि तेषां मौलिक्ष्
तेसर्वेक्लिष्टनयामोदमप्रमेनतेनामि रसवर्णनेनिरूपिते एवंयथापि इत्यादि सद्यःपरनिर्वृतये इत्यन्तप्रयोजनमा
विहन्यप्रभिधेयं काव्यं सर्वविशेषणविशेषितप्रभृत्यादि इदं कवितिप्रभोराज्ञायां वर्णनसमवसरविचार्यैव लो
केप्रवृत्तिः तथावेदेपि यावज्जीवमग्निहोत्रं जुहुयादित्यादिवाक्येषु उपपत्तिमनपेक्ष्य शब्दश्रवणमात्रा
त्प्रवृत्तिः अतएवात्र शब्दः प्रधाने वेदादावित्यादि शब्दात्मनेग्रहणे वेदादीनि वचनानि शास्त्राणि परमेश्वरादेशानि
तेषामविलंघ्यत्वमितिसम्बन्धः सुहृत्सम्मितेति यथाहितमहितं निदर्शितम् सुहृत्मित्रं तथा निर्दिष्टहितेन प्रवर्त्तय
तितथा सुहृत्सम्मितानाम्संबन्धः तत्रस्थान्तिसम्पादप्रधानप्रदर्शकाः अतएवार्थाभिधायिपदवतामर्थवत्तः तत्रशब्देपिर्द
हशास्त्रेपुराणादिषुविनिहितास्वारसार्थकथनात्तितत्पुराणाद्येनवर्णनाविधिनिषेधचोदनानां नोविलक्षणं अस्माद
र्थात्प्रवृत्तेतमाह शब्दार्थयोर्गुणभावे इत्यादि इदमत्र कृते काव्ये हि शब्दार्थयो विभावादिः प्रसाधयेत् तेन
वभावनाया प्रवर्त्तिते सहृदयेषु अनेकरसवद्विभावादि समस्त आलम्बनात्मकचमत्कारस्वरूपः स्वयमेवाविर्भा
वस्वाभावात्मको रसः प्रकाशते इति वक्ष्यमाणत्वात् समस्तोगिनोक्तः भावेनाव्यापारोविभावादिप्रसाधयेत् तस्मिन्वर्णन

यां तदर्थं प्रयोगाद्व्युत्पत्त्यर्थं योगुणीभावेनाप्राधान्येन हेतुर्नावेदादेरितिहासादेश्च विरुद्धलक्षणं विलक्षणं यत्काव्यं
लोकोत्तरेत्यादि लोकोत्तरस्य लोके प्रमादिभिः कारणादिभिरसादितावदस्माणस्यालौकिकस्य रसस्य वर्णनार्थं
निपुणो यः स एव कविः तस्य यत्किंचिद्व्युत्पत्त्यर्थमात्रप्रयोजकः तस्य कवेर्यत्कर्म तत्काव्यं यथा कान्ता समणितिमस्र स
नापादनेनैव विनेः स्वात्मन्यभिलाषोऽस्य दत्तेन रसास्वादेन चक्रोत्तानस्याभिमुखीकृत्य यत्किमपि स्वाभिलषिते कोतेन ।
कारयति तथा तत्त्वस्मिन्नैतेन तथा काव्यमपि सहृदयान्रसास्वादानुभवसंपादनेनाभिमुखीकृत्य सत्कर्मावरणा ।
द्यमः सर्वसम्यग्ज्ञानमभूत रावणस्तु उक्रमसंपन्नोभ्रष्टश्चतः शुभमेव कार्यं नाशुभं इत्युपदेशं करोति यथा
ह्लादपुत्रादीन्समब्रवीनेति यथा योगमिति राजादिगतो विनाश्वारपीत्तानस्यागमादिवद्वतिं तन्न रावणः ।
दिवदिस्मुपदेशमस्य सहृदयैनेव योगो न तत्क विनापि कवेस्तत्तयाः प्रागेव सिद्धत्वात अस्मथान हृर्णनाद्य प
पन्नेऽस्माति सर्वाणिदृष्टयोरपि इतिस्माव: इत्येतो हेतोः सर्वथा सर्वैः प्रकारैः कायवाग्मानसिकैः स्वत्वकाव्यस्य करणे वि
चारतो वचनीयस्तत्माह: कार्यः एवमभिधेयप्रयोजने प्रतिपाद्य कारणपूर्वकं कार्यं इत्यभिधेयस्य पृथमेकं ।
रणे विवक्षुः सावतर्णिकां कारिकामाह अस्य कारणमाह शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात ।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे शक्तिः कवेर्नवीजरूपः संस्कारविशेषः यो विना काव्यं न प्रसरेत प्र
सृतेवा उपहसनीयं स्यात लोकस्य स्थावरजंगमात्मकस्य लोकवृत्तस्य शास्त्राणां छन्दोव्याकरणाभिधानकोश
कलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रन्थानां काव्यानां च महाकविसंबंधिनां आदिग्रहणादितिहासादीनां

द्विमर्शनाद्व्युत्पत्तिः काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिरिति त्रयः स
मुदिता न तु व्यस्तास्तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्न तु हेतवः अस्य काव्यस्य कारणमुक्तमन्नाविवेचने
वहेतवः शक्तिरित्यादि शक्तेर्नास्तितया काव्यकारणे शक्तिर्भावनाकवित्वबीजरूपः प्रतिभापर्यायः समवा
यिकारणं संस्कारविशेषो भावनावेगस्थितिस्थापकेति त्रैविध्येऽपि भावनाख्यसंस्कारगुणस्यैवेह ग्रहणं
विशेषोक्तिः काव्यशक्तेः प्राधान्यमिति केचित् कार्यकारणतां हृदयेति यां विनेत्यादिना न प्रसरेत् चालमेत प्रसृतं वे
ति कवित्वाख्यशक्त्याहृतमपि सहृदयेतरशक्त्यभावादल्पत्वाद्विवेचिते उपहासास्पदमिति विवेच्यविवेचकता
क्तिः लोकस्येत्यादि विमर्शनान्मृदुरूपस्य संस्थानान्निर्वशकत्याख्यसंस्कारविशेषरूपा सत्पत्तिः सातिशयत
यात्पत्तिः तथा च शक्तिरिव संस्कारजातमदृष्टादिकं विशेषयति तथा चोक्तं दुःखादिना नष्टोऽपि संस्कारः पटुप्रत्यया
दन्यत्र प्रत्ययात् अभ्यासप्रत्ययाच्च पुनर्जायते तथाहि विद्याशिल्पादिष्वभ्यासमाने पुनः तस्मिन्नेवार्थे पूर्वपूर्वसंस्कारस
पेक्षमाणादुत्तरोत्तरस्मात् प्रत्ययादात्ममनसोः संयोगात् संस्कारातिशयो जायते इति तस्मात् सिद्धमेतत् भावनाख्य
संस्कारो जन्मान्तरीयज्ञानोपलब्धोऽपि निपुणतयाभ्यासेन च पुनरतिशयं प्रापितः काव्यस्य रचने विवेचने च हेतुः
इत्येव वचनाभिप्रायः तथाहि काव्यस्य रचने विवेचने वा शक्तिः समवायिकारणं तौ व्युत्पत्त्यभ्यासादिभेदेन शक्ते
गुणत्वात् प्रवृत्तिः समवायिकारणप्रत्यासन्नत्वादसमवायिकारणं साक्षादनुकूलमपूर्वं हि अभ्यासस्तु निमित्तकार
णं तथा चाकस्मिकवितं जायते शक्तेर्वर्धते अभ्यासयोगतः तथा चाहुर्नानिष्पन्नो व्युत्पत्तिर्न प्रयोगफलीति एवमस्य

मण्डितेमणीकाव्यप्रतिभाश्रुतेचबहुनिर्मले अमन्दश्चाभियोगोस्याः कारणंकाव्यसंपदः प्रतिभाकारणेनसमग्र
सुतिस्त्वंविभोषणे ऽश्रेषांसानिहादयामः काव्यसंपदाविवक्षितार्थिनिरिति यत्नकालिदासादीनांसुसंपन्नभासाभ्या
विनेवधानुसुलाभमसोपायाकाविनास्फूर्तिरिति नन्वपिप्राचीनमेकाव्यमदवर्णितावितथाक्रमस्त्येयाविनिर्मिद अ
पहेतुक्यन्ततरेकाव्यमलत्राणेविवक्षः अदोषगुणवत्काव्यमलंकारैरलंकृतं समाख्यातेनकाविचक्षुर्वकोनि
प्रीतिंचविन्दतेनिवाहिगुणोऽकाव्यमासाकिमत्रहस्यत्राह एवमस्यकाव्यस्यस्वरूपमाह तददोषौशब्दार्थौस
गुणावनलंकृतीपुनः क्वापि दोषगुणालंकाराणांस्वरूपंतेक्वापीमतेनतदाह यत्सर्वत्रसालंकारौक्वचित्तुस्फु।
टालंकारविरहेपिनकाव्यत्वहानिः दोषगुणालंकाराणांस्वरूपमाध्युल्लासमवतत्र्येयल्लक्षणेयत्नाहरस्याद्यातोभ
विष्यमाणनिर्देशः अत्रतद्देशमात्रेणतददोषावित्यादिनातेनशब्दार्थाविशेषणेनतत्तत्पदमेवस्याद्वाकोल
नामकस्मादिना द्वितीयालाभेवस्त्वमाणेकाव्यंशब्दार्थावुद्दिश्य नतत्रैकोव्रनयथाकथंचित्सगु।
णमासेत् अतएवमाहोपन्नस्यद्वेतत्तेनातिमात्रमादोषशब्दार्थविन्यापितेरसमनायकाव्यत्वनिप्रसक्तिः नस्यात्ति
द्वमेवकाव्यलक्षणंयत्रात्मस्वरूपस्पर्शमादिश्यतेसौगायनतत्स्मृतेशब्दार्थौशुद्धदोषरहितौदोषश्चसामापकर्षकैः।
कुष्ठित्वजाड्यादिभिर्विष्कम्भस्य शौर्यादिभिरिवमाधुर्यादिभिर्गुणैःसमोत्कर्षकैः पोषितैःअलंकारैःशब्दार्थौ।
भयरूपैःपरम्परयारसस्योपकारकैःहारादिभिरिवालंकृतौपुनातेनादृशौशब्दार्थौतददोषावित्यादिवाक्यप्रयोगेनप्रको
तेकाव्यंभवतीत्यन्वयः नन्वत्रदोषत्वगुणत्वएवविद्यमानेऽहंकाव्यमित्यस्मत्पातेनरसालंकाराविस्माशा।

का॰ टी॰ ६ कथाद्ध क्षापांसादि विशेषप्रतिषेधपक्षोपाभ्यनुज्ञेतितत्सायात्कोविदेवप्रथमेकतात्पर्यवतिकाव्ये ॥ तत्रेष्टकृती
प्रसवत्रसमालेहृतीपवेतिभावः अत्रानुदराकसेतिवत्त्वं नर्थिध्वदर्थे वाचकतया स्फुटस्यवाच्यत्वेन प्रकाश
स्यप्स्यकस्पविद्दलेकारस्पविरहोपप्रथ्यितो ॥ स्फुटस्यप्रतीयमानस्यप्रतीयेवतकाव्यतद्धानिः एतदेवैदोहर
णं॥ यथा यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिला
सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते॥ कुमारीभावस्थ
रसहत्सतात्पहृत्सार्थोत्सास्मिन्समयतिमभिलाषमुग्धाहिनेवान् सएवस्सतत्तायादकएवततमक्वाश्चित् हि
प्राहोवयारणे तत्रश्ववरापवेक्षोभिलषणीयएववततमभिलषणीयः एवंतावततास्मिन्समयतियाभिहृद्दीपिता
तापवततन्यादृशाः एवंतेचोन्मीलितमादीन्येच साचैवास्मि अस्मीतिविभक्तिप्रतिरूपकोनिपातोहमित्य
र्थः तत्रश्वयप्यानदास्मिन्चेसमुत्कण्ठतितयाभिरेवचैत्ररुपाभिहृतकर्षितोना सेवाहमस्मितत्रसादृशी एवं
मस्यपितत्रसुरतव्यापारोभिसरणप्रकारादिः सेवलीलाविनोदः तस्याविधौकरणे तिरस्कृतसम्भोगे न
कर्पणोर्ध्वेवारोधसीतरुः तत्रतीविषयेचेतः समुत्कण्ठते उत्कण्ठासहत्तकतोयेषांभावपर्याया कालातम
ताद्रूपाभजते अत्रदत्तपाश्चस्यमालतोरुद्वीक्षविकसति कदम्बवर्षासितिकथमेवयतितोत्तुपपत्तामामस
सर्वमेतत्सर्वपुण्यानीतिकविसम्प्रदायादेवावसेयोबोध्यः अत्रस्फुटेनकश्चिदलेकारः अस्फुटप्रतीयमा
नाविभावनाविशेषोक्तिः तत्रप्रथमेकरः समन्वयचेति शोभाभ्यनुज्ञयासमेवसर्थः तथाहि कालातम

नमोनस्वकाम्बिष्टप्राप्तिमस्त्रहाद्विभिः गुवेशेणभवन्नविनानिः प्रवामास्थिग्ननादिकत्न इतिलक्षणेवलक्षणा
उक्तं दण्डिनाहि अप्रसिद्धेष्टप्राप्तिमस्त्रहादिकारणमलिखेवन्नादिः सांनिहितएवेनिहष्टप्राप्तिमस्त्रहाभावेपि
कार्योत्पादउक्तेनायाउसन्निरितिनिकारणं कार्ययोःसन्निलक्षणोविभावनालंकारः सवेनस्फुटः विभावकावकैर्ती
त्रादिभिः मालाकृहेरनक्रमताकिंतद्भगयइमर्थः तथावादादमिनामतादावकैः शाहेः अस्मेश्नेमराज्ञेता
मेगयद्भीमादि एवंवाचकैः स्यान्यूनेनामानन्दः विभावोत्रमासृभिमितिनि ययेकतन्मप्राभिष्टप्राप्तिकारणेनप्रा
वनादिग्रभोष्टाप्नासमासयियनेरल सन्निरितिकारणेक्ष्डावेकार्योनसमन्निलक्षणोविशेषोक्त्यलंकारः सोपिनस्फु
टोद्र भावमग्नाद्धिः मात्रादनक्रमतान किंतनवाक्यगन्ययत्निविरोधिमाउक्तं दण्डिनाः सन्नयायभमावाखं
गयहमर्थः तथाव विभावनाविशेषोक्त्योरेकतरमप्यरोयहेमावकमितिनसमपीहहारिवायकतास्तीतिसन्देहेम
करन्रूपोलंकारः सोपिनस्फुटः पूर्वहेतनक्रमताद्ध्यगएवेवमर्थः तथावेरवातोयमीमादयान्निसएवसमम्यानि
मिन्नार्थाः तथाचेन्ययोजनायः कोमारहरः सएवहिवरः तथापिचैयिमहनन्मपापाविपपर्थ एवेनापवैद्वयं
नयाःतथापि देवाषेयमिवेतः समन्कापटनेनेवोन्मीलितमालतीमग्नभयः प्रोढाः कदम्बानिलाः तथा
पिवेतसीनन्तलेवेनः समन्कापटनेनसोवेवेति अन्नसपिमिव तथापिवेनः समन्कापटने प्रेक्षसन्नोभनभि
न्नभिन्नविषयताद्वेकरूपाणमर्केठाक्रियाणांयोगपद्येनसमन्वयालंकारः सोपिकोयएवसमन्वयवाचके
रशाखादिभिरनभिहिततान अपिवसमपिग्रयस्फुटोनप्रसोथोलंकारोपदचैवास्फुटनेमकं नत्रस्फुटप

कृ॰ टी॰

७

वस्यैव ध्वनेः काव्यत्वमाशङ्क्याह रसस्यापि प्राधान्ये नालंकारत्वं रसस्यापि गुणीभूतत्वेन रसवदलंकारत्वं वक्ष्यति इत्यत
रसस्य प्राधान्ये ध्वनेः काव्यत्वमेव नालंकारत्वमिति भावः तथा चात्र कस्याश्चिदुपपतिमालम्बनाम्नारतिश्चेन्द्रपादि
भिरुद्दीपितेन हर्षोपितयाऽनुकूलाया अभिचारिभावेन संचारितेन भीष्टस्यैवोत्थं स्वयं तत्त्वापारलीलाविषयेरनुपगमा
नकं च स्वाभाविप्रलम्भशृङ्गारनामजने सम्पत्तिप्रधानत्वं कस्यचिदंगे एवं काव्यस्यासामान्यलक्षणमुक्त्वा विशे
षलक्षणपूर्वकं विभागमुद्दिशति तदिदानीमेतमाह तस्य काव्यस्य भेदान्विशेषान्क्रमेणोत्तममध्यमावरतया इद
मुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः व्यङ्ग्ये व्यञ्जनाव्यापारगम्ये अर्थे वाच्यान्मुख्यात्संकेतितादार
थादतिशयिनि सति चमत्कारित्वमिति इदं काव्यमुत्तममेव बुधैः कथितं कथितमिति तत्प्रमाणको निर्देशः प्रकृतिप्र
तस्य काव्यस्य शब्दस्यापि ध्वनिरूपतया तत्रोत्तमे काव्ये ध्वनित्वं कथितं इति ध्वनित्वेनोत्तममिति क्रमः ध्वनिरिति विशेष
णस्यार्थमाह इदमिति काव्यं बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः प्र
धानेति प्रध्वंसवयातेनार्थोपपादकत्वात्प्रधानभूतस्वरूपमेव स्फोटः तद्रूपव्यङ्ग्यस्य व्यञ्जकः यः शब्दः तस्य ध्वनिरिति व्य
वहारस्य सत्त्वात् तथा चात्र शास्त्रप्रक्रिया वाह्यात्प्रयत्नभेदादुत्पत्तिनिर्वायवीयाध्वनयः प्रत्येकमेव तत्तद्वर्णा
र्णात्मकतया स्फोटमस्फुटमभिव्यञ्जयन्तः पूर्वपूर्ववर्णविषयसंस्कारसचिवा लाभादेतत् स्फोटमाभासयन्ते तथा चान
प्रस्तमितनिखिलविभागोल्लेखक्रमसमन्वयवपके विस्पष्टमस्थैव तत्समस्तमनुभूयते यदिदं वर्णात्मकपदं तत्तदेकबुद्धि
निर्ग्राह्यमिति प्रतानस्य तावद्बुद्धिः पर्यवस्यति प्राह्लादस्थैर्यप्रतिपद्यासमह तत्त्वप्रदेशोऽपादते तस्माद्वर्णव्यतिरिक्तः का

१

पि न सम्भवेत्तेकः यस्मादर्थः स्फुटीभवतीति स्फोटः इति वैयाकरणाः अत्र च यदि वर्ण्णातिरिक्तं पदं पदातिरिक्तं च
वाक्यं न तदार्थप्रतीतिर्न स्यादिति तत्राह न वर्ण्णाः प्रत्येकमर्थं विबोधयितुमर्हन्ति आद्यवर्ण्णेनैव शेषवर्ण्णवैयर्थ्यप्रसंगात् सा
मुदायश्चैतेषां न सम्भवति एकवर्ण्णग्रहणसमये पूर्ववर्ण्णानामसम्भवात् इति स्फोट एवार्थप्रत्यायक इति मायकेटस्य
अत्रेदं तात्पर्यं स्फोटशब्दो वाच्यवाचकभावेनाभिधानसम्बन्धेनेति ताभ्यामाविर्भावात् न तत् वर्ण्णगुणावार्थबोधायाश्च
वात् किन्तु व्यञ्जनैर्वर्ण्णैर्व्यक्तिर्नेति न तत्त्वमतात् समाधिभिर्नैव सम्भावितवाच्यवर्ण्णव्यञ्जनं तमसमस्य शब्दार्थपुद्गलः
स्य ततो यतो हेतोः स्फोटस्य व्यञ्जको ध्वनिरुच्यते ततो हेतोः ततः प्रभृति वीतेषां वैयाकरणानां मतानां स्याभिरथापि
ध्वनिकारादिभिरालंकारिकैः सम्भावितमुपमर्ज्जनीकृतवाच्यमात्मानं व्यंजकेति तेनार्थो येन तत्र हृश्यते तद्गुणं तस्य व्यञ्जने बहुम
समर्थ्यवततः शब्दार्थयोः पुद्गले तस्य ध्वनिरिति निरुक्तौ कृतेनान्वयः अत्र च शब्दार्थयोरिति द्वावपि शब्दार्थौ व्यञ्जकः का
व्यमिति तत्त्वावबोधति तथा व्युत्पत्तिरुक्ता यत्रार्थः शब्दो वा तमर्थमुपसर्ज्जनीकृतस्वार्थौ व्यङ्ग्यः काव्यविशेषः स ध्व
निरिति सूरिभिः कथितः एतदेवोदाहरति यथा निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो नेत्रे दूरमनञ्जने पुलकिता तन्
वी तवेयं तनुः मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमा वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् अ
त्र दूतिकमेव गतासीति अधमपदवाच्ये तद्व्यज्यते निःशेषच्युतेत्यादिना विशेषणानामन्यथासिद्धिरिति दूषणं
सर्वाङ्गीणं निर्दिष्टः निःशेषच्युतेत्यादि तत्रैव ऐकान्तिकमधरोष्ठरागापगमनं तथा वाच्यं दूतिकामुखं चुम्बितमात्र तत्र तदी
यस्य विशिष्टः नेत्रे दूरमनञ्जने इति कटाक्षवशाञ्जने पुलकितेत्यादि तथा प्रथमसमिव पुलकितानन्तत्वावि

का॰
टी॰
८

शेषेण नन्वीदमानन्तमङ्गावयवेरिवेतिमिथ्यावादिनि वक्तृथाप्यस्थितोपि न यातः स्नातेदिदितिहृति केवलं संतापकारिणि
नत्रमपि ॥ अज्ञातपद्धबोधवजनस्याज्ञातः । पीडागमः पीडाभविष्यतीति यथैतादृशीं वमितो मत्समीपाद्वापीं स्नातुं गाः
तासि पुनः । नतरा तस्यासमर्थत्वापेत्यानीवाभिलक्ष्येणावामग्रिमिड्स्यायमस्यातिः । स्वैहृस्यनीचावानुरागिणि एषु समीपामिति सोः
स्यांगेन विशेषेणनामसर्थावगमात् । वापीमिसत्रवाच्येन विधित्वानिषेधो यो वा इत्यते । तथा न पुनरिसत्रानिषेधेन वाच्येन वि
पिविज्यते । तथा च वापीस्नातेगमनं तन्निषेधश्च जना । वापीं हि जनाविकोणतत्राहिंदीडयातथाविधमार्जनाभावात्रिः ।
शेषेण चन्दनच्यवनं तस्मात् । यदि हि स्नानं ततटादम्यापि स्यात् । तथा स्नानानन्तरं तेनैवाङ्गमार्जने किं इमथरपवद
योरष्ठयोः स्यात् । तथा नेत्रे दूरमनञ्जने कथमर्वजनेति कटोपि किंत । तथा तनुः पुलकिता किं स्नानप्रोमास्तुलकामस
योपि स्यात् । इयं तन्तुलक्षणानन्तौ किं मस्नानाविशेषतो दृश्यते बोधरेवास्यादिति । एवमेतनिःशेषेत्यादि । तायकस
न्वयोः रुचतकरणगमर्थः । निःतायथयपानेविवतमतयनदयुम्बतेगाढपरिरम्भणेहेदयाहृादनेवमिथ्यावादिनी
सादीनाहृतीविशेष्याविशेषणानां । पदानांतत्स्यायमर्थमेत्तिपादयोस्सहायेनन्तदतिकेंगतेगमनव्यापिमेवव्यनक्ति । यः
स्वात्रासोवाच्यतह्स्येगपानामम्मोम्नेविशेषविचारः । सोग्रंपवमोलासेपरेतनेशनतोहायनम् । एवमन्नमस्पलदाण
मावयदिषणमयमस्यापुदिशति । अतादृशीगुणीभूतव्यंग्यपंव्यगपतमथ्यमम् । अतादृशिवाच्यादनतिशयीयति वाच्य
मेवयत्र चमत्कारिव्यंगपत्र वाच्येन समन्तस्मादप्रधानेवासन्तचमत्कारितकाव्यमव्यगुणीभूतव्यंग्यमितिसमर्थः । एतद
वोदाहरति । यथाग्रामतरुणंतरुणानववञ्जुलमञ्जरीसनाथकरम् । पश्यन्त्या भवतिमुहुर्नितरांमलिनामुखच्छाया ।

८

अकारणे दोषविशेषं
भः गृहे दाराश्च
यत्रानुरक्तिः प्रकृष्टा
नाभीष्टमुपैति वि
प्रलम्भो ऽसौ इति
साहित्यदर्पणे यत्रेष्टं
नाप्नोति से

अत्र वेगलल्लतागृहे ऽत्र संकेतानागतानामीनिरुंगपयुणीभूतेन दैपत्न्यायावाच्यस्यैवमसकारितम अत्र कविविवक्षित
स्याविप्रलम्भाभासस्यवाच्य स्याविमालिम्नेनव्यंगय सेकेतभ्रष्ट उद्दीपनत्वेन पोषकत्वमिति भावः तथाहि द्वितीयपाद्य गुणी
मत्तरूपणम्यालम्बनामयापतिः नववेतसूलेमादितेद्दीपिता मीलितेस्याद्युक्षभावानमेयैरोत्तरक्यादिभिः संचारिता
भीष्टस्य तस्यादेषत्वोपयामासि प्रलम्भस्य सतो ग्राह्यान्तरतीयस्य कार्यप्रकर्षस्य लतणएवदिष्यति ग्राहश्चित्रंवाच्यचित्रम
व्यंगयेनमस्पष्टत्वे चित्रमिति गुणालंकारयुक्तं अव्यंगयमिति स्फुटप्रतीयमानार्थरहितं अवरमधमम अव्यंगयकाव्य
विविधं वाच्यचित्रं शब्दचित्रं च व्यंगयेन प्रधानेनापि गुणीभूतेन काव्यस्य वैचित्र्यसंभेदादिवकल्पविचित्रकाव्यार्थचित्रमिति
तेना तदनुप्रकारावृत्तिविशेषणविशिष्टकाव्यस्य शब्दार्थंपयेनात्मा अप्रतिपन्नाम भूतेव्यंगयस्वन्तःस्यापि तैव
स्पष्टारीस्याच्य काव्यस्य स्पष्टार्थचित्रमात्रस्य कथं काव्यत्वं व्यपदेश इत्याह अव्यंगयमिति न त्वत्र व्यंग्यस्याभावतम भा
वः किं तस्फुटत्वे विलम्बेनोत्प्रेक्षितत्वे कवेर्बुद्धितात्पर्यविषयीभूतत्वेवेति अत्रापि पूर्ववत्त्रयं शब्दार्थवाचकत्वे
पं व्याख्या केचित्तु अभाववावकतयैव नञः केवलवाच्यवाच्यवैचित्र्यमात्रस्येयेनोपनिबद्धमालेख्य प्रख्यम
दाभासत्वेन चित्रं तत्र्यक्षेकाव्यकमात्र कार्थं वा यथा उदाहरणमपि अत्र नियतोक्तः तस्मात्स्वादितव्यं उदाहरणमकार्थ
वापि समभावादेरवगुणस्याकाव्यत्वमेवेति अत्रेदं तात्पर्यं यथालेख्ये नानावर्णकैः स्वरूपग्रहणं राजादि प्रसमालो
कयत्वमन्त्वतमतमः तादृशं नापेक्षते सात्वासरोभासमानमर्पितिनिपालादिके तथैवं काव्ये वाच्यवाचकवैचित्र्यमात्रा
श्रयेण कगीतिसमाकृष्टहृदयाः सहृदयाः सदपि व्यंगयविलम्बोपास्थितत्वात्रानुसन्दधतीत्यर्थः तत्र शाह्याविवसदा

कु॰ टी॰ ५

हरति यथास्य कटो कलदक्षकक्ककूहरस्क्रानेनगास्तक्कटापूर्वकं स्नेहमहर्षिदर्शविहितं सत्कानाहिकाहृये
वःभिदाङ्गच्युडदारदङ्गरदरीदीर्घादीर्घकमद्रोहाद्वेकमहोर्मिमेरुमदामन्दाकिनीमन्दताम् स्वस्कन्दयथास्यान्नथा
नन्तवानादिवशेनोक्कलेनीग्रक्काकक्कक्कहरेणुक्कानेनगातस्याग्रमनक्कदापरमरायमाननाहस्पी एवंमूर्द्धे
नप्रपन्नोहोत्तानेयचेनाहश्याश्वतमद्दर्थयः तेहर्षणहर्षायमोज्ञायवाविहितेस्थानमभिषेकः श्राद्धिकेसत्यावा
न्तनादिवेयश्वयस्यामेनाहर्षी तथाउद्यन्नूरुक्तुद्रामहस्यश्वनाडर्थदर्योमङ्कानिवासगोनाः तेःक्षतानस्वेषुग्र
वेनदीर्घोग्रनताश्चतेऽदीद्रास्यतास्वतेडूमालेघाद्रोहः पातनेनास्मिन्नदेकमेयाश्रमस्तक्षुश्वतेडूमेयः तेक्ष्णतामे
द्रोमेदोहेकारोयस्यान्नाहर्षीमन्दाकिनीवामन्दतोनाडोभिघ्रान् अत्रमन्दाकिनीमन्दयातीमन्दतोभिघ्रादितिम॰
सापिविमेयालेकावेणथैर्वविश्रमयस्यामपदेशाभवेतीतिप्रायामेनशाहविक्रमेनिधष्टोल्लासेतिणिप्यमाणतावादन्त॰
श्रमः शाह्वालेकावेगुणडोजः तथावाचकवेमेन्दाकिनीमालम्ब्यानानागतिः मन्दाकिनीविपाथणेस्त्वदापिनाग्रन
केरण्यमनीयमाने मेसादिभिर्विभिवारिभिः सवासिताश्रवतेप्राप्तापिनकगीमवमासते अनुप्रासेणदोविनाकम॰
णेनात्रभावोविलम्बेनप्रतीयतइति ग्रथविन्नम्हदाहइति वाक्याविद्ययथा विनिर्गतेमातदमात्ममन्दिराद्भवस्यपक्ष
स्यपहस्कस्यापियम् ससंभ्रमेन्दद्रुतपातितार्गलानिमीलिताक्षीवभियामरावती यहेयग्रीवमानन्दमित्युणाशङ्काप्र॰
दशान्तणामानविड़तायदक्षयायेनकेनाप्यभिलाषेणनन्विजिगीषयात्ममन्दिरान् ननुपात विनिर्गतमुपक्रम
कर्णकार्णिकयाकिंवदेसानतहसादिसावेननिश्चितससंभ्रमः सनवोयइन्द्रेनतस्यपातितःअर्गलः यस्यासनानन्न।

विलम्बभयात्कस्मात्पुनरत्रभूमिमेतानाष्टश्रीरामस्याविनीभयानिमीलितादीवजाता अत्राप्योजोगुणः अर्थालं
कारउमेदानन्तकालोपस्थितमायथावमत्करोतिनत्याओपेहयग्रीवविषयः प्रतापोवाभावोवाकविसम्बन्धीता
गर्याअवेतनन्नाङ्ग्यानकरसाभासोवाविलम्बेनोपस्थितोनवमत्कृतोति अत्रापिपूर्ववत्समपिशब्दालंकारौ
नुप्रासेउमेदायापवप्रायासामिसर्थ्यविचोदाहरणे वीर्यातिशयस्यैवोत्साहस्यहयग्रीवआलम्बने उद्वेमुमुः
द्दीपने यदचक्रासेवयणगम्याभूतिः संचारिणीतस्यैवविभावस्यप्रवालम्बने वीर्यातिशयउद्दीपनमितिमिदं
इति श्रीकाव्यप्रकाशादर्शे राजानकानन्दकृतौ काव्यादेशादर्शो नाम प्रथम उल्लासः ॐ श्रीशंकरो जयति
अथ काव्यलक्षणे दृष्टे शब्दार्थौ लक्षयितुं द्वितीयोल्लासं नारभते क्रमेण शब्दार्थयोः स्वरूपमाह क्रमेण प्र
थमं शब्दस्य ततोऽर्थस्येत्यर्थः स्वरूपमसाधारणधर्मः तमाहलक्षयतीत्यर्थः स्याद्वाचकोलाक्षणिकः शब्दोत्र व्यञ्ज
कस्त्रिधा अत्रेति काव्ये तेषां स्वरूपं वक्ष्यते शब्दविभागान्तेन त्वर्थविभागः अर्थस्त्वासां तेषां शब्दलक्षणस्य अत्रेत्य
मिति नद्दवशब्दानां लक्षणमस्मिन्नेवोल्लासे कथ्यते इत्यर्थः एवं शब्दविभागमुद्दिश्यार्थविभागमुद्दिशति वा
च्यादयस्तदर्थाः स्युः वाच्यलक्ष्यव्यङ्ग्याः तेषां वाचकादीनामर्थाअभिधेयाः मतान्तरमिदं तत्र तात्पर्यार्थोपीति न
मप्युद्दिशति तात्पर्यार्थोपि केषुचित् आकाङ्क्षासन्निधियोग्यतावशाद्वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्
पर्यार्थो विशेषवपुरपदार्थोपि वाक्यार्थः समुल्लसतीति अभिहितान्वयवादिनां मतम् केषुचिदिति केषांचिन्मते
पुनः सर्वेषां सर्वत्र वाचकत्रयस्य वाच्यत्रयमित्येव प्रसिद्धिः आकाङ्क्षा सन्निधिसम्पन्नपदार्थो वराजितासे

का॰
टी॰
१

कृष्णमंजलीदर्शितान्महोद्यानितान्तोबहूनांपदानांअन्वयबोधार्थमप्रमोमायेनाकांक्षा सावश्यान्तर्जितासान्नर्थप्र
तीतेरर्थयवसानमितियावत् एककुत्र्याविच्छेदेनान्वितत्वसम्बन्धोसन्निधिः योग्यतापदार्थानांपरस्परान्वयबोधार्थ
भावः एतत्त्रितयवशादनुपलभ्यमाणानांपदानांदेवदत्तगामानयेत्यादिवाक्येगवादीनांसामान्यरूपाणांपरस्परसंसर्गेना
सत्यार्थः विशेषवपुरपदार्थोऽपि वाक्यार्थः सास्नादिमदर्थप्रदेशादेशान्तरप्रापणार्थो अपदार्थोऽपि सामान्यवाविभर्गा वा
दिपदैरभिधेयोऽपिवाक्यार्थः सम्बन्धस्तेनेतिसामान्यवाचिनांगवादीनामन्वयनासम्भवतामर्थविशेषव्यानसनीतिवि
त्याभिहितान्वयवादिना अभिहितानांपूर्वमेवानेनसादिवृक्षयसामान्यमेकेतिनानागवादिपदानांपश्चादाकांक्ष
विस्तपयानामर्थविशेषाणामन्वय इति वादिनांमते वाच्यएववाक्यार्थोऽन्विताभिधानवादिनः देवदत्तगामानय
येत्यादिवाक्येनाभिधेयः सास्नादिमद्व्यक्तेर्देशान्तरप्रापणानुकूलोऽर्थो व्यापारक्रिया इति पदार्थान्तरसाध्यप्रयोजनाच्छपवमाता
न्स्वकेनितएव किंतामर्थप्रतिकथ्यतेनेति अन्वितानांपदानांपश्चात्सङ्केतइतिवादिनः एतदेवविस्तरेण
पश्चात्तेऽपिसमोलासे एवंवाचकादीनांवाच्यादीनर्थानेकाकेवाच्यादीनांएवंविधत्वकंनविवक्षा यादृशंवाच्यप्रा
प्तार्थानांव्यञ्जकत्वमपीष्यते सर्वेषांवाच्यलक्ष्यव्यङ्ग्यानामर्थानांव्यञ्जकत्वंप्रायशो बाहुल्येनवस्तुनोऽलङ्कारादिवै
शिष्टेनवस्तुमात्रेणेष्यते अपिपूर्वसमुच्चये वाच्यः काचिदित्यात्मनैवविज्ञातः कविदुद्धमममपिव्यञ्जकोऽसमर्थः प
वलक्ष्यव्यङ्ग्ययोरपियोज्यमेतदेवांदाहरति तत्रवाच्यस्ययथा मापन्थरागाय्याणोज्जताबुणन्थीतिमाहिर्येत
मएतामणकिंकन्ततिज्जं एमेग्गणवामसोहा अज्जसावविहाणीणीतिच्छयते मातर्गृहोपकरणमद्यखलुनास्ती

१

निशामयित्वा तेन यथा तदत्र किं कारणं येनैवमेव न वा समागच्छति साधित्वेक कथितं तेन यथा त्वन्मातापितृजनमध्ये न वाचो
नालापो प्रभूते धनिते तथागृहे ह्यपि कारणमेव तेन गृहं समग्रं अवशेषं पाञ्जेनीयत्वं अद्यैति कालान्तरमेतनृति
साधित्वेन तथेतिवचनमयेतिष्ठं कोऽन्यवलिसति: तद्गणैः सार्द्धं तत्र कर्म यानवेष्टयमिति अद्यैवान्तरकमेव एवमेव
सार्द्धं ना अद्यैवातत्प्रयाद्दिनाप्रगमे तत्र तदाजन्यादिनाकिं विलंबे चामीमेनवर्तुयेयथं मानः प्रसभित्वा सनत
मुष्टिकेनेत्रतिदिनाव सातेनेतस्यमागमो भविष्यति धनिते तत तस्य यथामाहितो सहितस्य हस्तेऽप्रविणे विणक्सिमत दुनिआ = ५
कपसमावणे हि कारणे सहितस्य प्रदाववितपूर्वसमप अद्यसमस्तियं समयं मातयापायत्वसमावित्तमितिलब्धे
तेनकामुकविषये सावस्यायनप्रकाशते कायापमे साधयेतो सावि सहभगवानणे त्वणिपूर्वसामिममकृतेसद्भाव
केदकरणीय सहपोनावन्नयाविधिवितै तथैकायाचातानापरायौसहतीप्रतीयमकिं: वाचामपवलसूत्रिदेति
सुखोत्थितसाधयं सेतिनेनरमयेतीति सर्वोसनेतवैविणी निसत्वेसनेनरुष्टेति समुत्थाने इमतेनसमापकारये
तिसद्गावेसत्रमहपाम ऊनममस्त्योपर्योलब्धते इमेवं वाक्यार्थमृत्तेनलसोणसूतीसमस्योगेनकामकोयंसह
तीर्थं तत्रेतेनसापरायप्रतिप्रकाशते लोके बुध्याणनेवंयम वोपमयमयाउ णि वृ लतिक्षेदाविसिणीपन्नस्कि
३ देहयेवलाका निर्मलमणि प्रभा अप्रणपविद्रुमसंवसनि घ अवनिस्थलत्तेनाभूलनेनेनजनरहितनमनःसे
केतस्यानमिति कयाविकेविसमवाते उवानेनियानः पश्चपति क्रियार्थेपथपतिस्थलतिमिन्नाविसिनोपेत्रराजा
नेवलाका निर्मलमरकतभाजनप्रतिष्ठिनापोवत्रुकिमिव देविस्थलमवैकेतमसाहाप्रवेशापरोभवव अद्यवा
अ = ४

का० टी० ११

विश्वलाप्रदेशान्तरसमागच्छतीत्यासौ अतएव निमस्यकायचेष्टास्मा शंविश्व अध्यवामिथ्यावदसि ननमत्रगतो भूरिति
विस्पतेस्तलकाद्युपयोगीशुंवोविएऽः ननम्रक्रान्स्फोटः तस्यबलाकासाम्याभावादिति विस्तरिकाकारः शुंवस्य
हे अथार्थविभागानन्तरं शब्दं लक्षयति वाचकादीनां क्रमेण स्वरूपमाह साक्षात्संकेतितं योऽभिधत्ते स वाचा-
का: इहागृहीतसंकेतस्य शब्दस्यार्थप्रतीतेरभावात् संकेतसहाय एव शब्दोऽर्थविशेषं प्रतिपादय-
ति इति यस्य यस्याव्यवधानेन संकेतो गृह्यते स तस्य वाचकः अस्य शब्दस्यायमर्थो वाच्य इति अभियुक्ताभिधानसम-
पितादिवनासिकमानयेत्यादौ परस्परव्यवहाराभिहितेः क्रियमाणं पार्श्वस्थस्य शिशोर्बुद्धिमति करणं संकेतः स च यस्य
शब्दस्य येन रूपेण गृहीतः स शब्दस्तेन रूपेण तमर्थविशेषं प्रतिपादयति यथैकपञ्चचोरशब्दो वादिगुणमात्रमो-
दनाद्यर्थमायां वर्तते वामिनं तत्र करार्थः प्रतिभातीति तत्साक्षात्संकेतेनैव शब्दोऽर्थविशेषं बोधयतीति यत्र यस्याव्यव-
धानेन संकेतो गृह्यते तत्र तेन रूपेण स शब्दस्तस्यार्थस्य वाचकः अत्रेदं तात्पर्यं संकेतितोऽर्थस्स-
भिधत्ते येन तावति वक्तव्ये साक्षादनेकार्थानां शब्दानामेकस्मिन्नर्थे संयोगाद्यैरव्यवधानेन वाचकत्वनियमिते
व्यवहितेति हितेत्यार्थे व्यपेतिव्याप्तिवारणाय एवं साक्षादभिधत्ते इत्येतावतैव सिद्धे संकेतग्रहणं लक्षणादिव्या-
प्तिवारणाय न हि गंगाशब्देन तत्तटार्थः संकेतेन गृह्यते संकेतितार्थं विभजति संकेतितश्चतुर्भेदो जात्यादिर्जातिरे-
व वा आदिशब्दाद्गुणक्रियायदृच्छानां ग्रहणं अत्र वाशब्दो व्यवस्थायां तेन केषांचिन्मते जातिरेव संकेतिताणा
नेन गुणादयः समर्थः तत्रादौ तावन्मतद्वयमपि संकेतितं दर्शयति यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्यता व्य-

क्तिरेव तत्राप्यानन्त्याद्व्यभिचाराच्च न तत्र संकेतः कर्तुं न युज्यते । न खलु देवदत्त गामानयाश्वमानयेत्यादौ व्यक्तेरेव व्यव-
हारविषयत्वेन तत्रैव संकेतोऽस्तीत्याशंक्याह यद्यपीति ग्रन्थः प्रयोजनक्रियानिर्वाहकारी हेतुः तस्माद्व्यक्त्या व्य-
वहारविषयतयाहतिरिक्तमोर्नयनानयनयोर्योग्यागवाश्वादिव्यक्तिरेव न जातिः तथाप्यनेकस्या गोव्यक्तेर्गौरि-
यमिति संकेतेन सूचितव्यक्तीनामभेदात्सर्वत्र संभवात्कार्यः संकेतः पुनरनन्त्यस्याभिमायुरवस्थानव्यक्त्यपि क्रियमाणः सं-
केतो न दुष्यत्वसमीति त्वव्यभूतादानमदोषाच्च पुनर्व्यक्तिरेव संकेतविषयत्वेनानपदार्थस्तु एवमादौ कस्याचिन्नोव्या-
क्ताव्यक्तेन पदार्थस्पर्शो मत्रकामवायप्रासिद्धिनित्यभिचारदोषात् न तद्व्यक्तौ संकेतः कर्तुं न युज्यते युक्तिं न सहते
ग्रन्थवाच्यप्रकारान्तरेणापि दर्शितो व्यभिचारोऽविवरणेन भासि: यथा व्यक्तिरेव तत्संकेतविषयतयाऽङ्गीक्रियते स-
संकेतस्सर्वास्थितो व्यक्तिषु तत्रैकस्याकस्याचित्त आद्यस्येन आनन्त्येनद्वितीयस्य तत्रहि पक्षसंकेतितानकयद्यस्संके-
तिता एव व्यवहारविषयः नहि गोरश्वपदार्थस्याभेदस्यानन्त अश्वोपगोपदार्थाभिमित्ति व्यभिचार इति इति गोः शुक्ल-
श्चलडित्थादीनां विषयविभागो न प्राप्नोतीति चतुरूपाधावेव संकेतः इमतो हेतोः एकस्याव्यक्तौ व्याकृतेऽपि संकेतेविष-
येषु व्यक्तेषु विभागो गौः शुक्लो इत्यादिविशेषत्वानेन प्राप्नोति व्यक्तीनामपरस्परं प्रार्थलीयता कामसंकेतितानां व्यक्ति-
वहारात्प्रादमस्तु अप्रमाणस्तु विलक्षणत्वात् तत्राचाग्रवर्त्याति अश्वैव हिस्मयचाम्प्रादि इत्यतो हेतोस्तदुपाधावेव संके-
त्यगुणक्रियावाचकानामुपाधौ उपसमीपेआधीयते इत्युपाधिर्विशेषणं तस्मिन्संकेतः क्रियते तत्र व्यक्तिषु उपाधि-
मेवाविभजन्ति उपाधिश्चद्वैधा वस्तुधर्मो वक्तृयदृच्छासन्निवेशितश्च उपाधिश्च विशेषणमपि वस्तुनोयमः सा

का॰
प्र॰
१२
12

भाविकः वक्तुर्वक्त्रे यदृच्छया यादृच्छया संनिवेशितमेतादिरूपोपीति द्विधेत्यर्थ आद्यः वस्तुधर्मः सिद्धः साध्यश्चा
स्पष्टं सिद्धोपि पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च पदार्थस्य गवादेः प्राणो व्यवहारयोग्यतासंपादः विशेषधेयमन्यो
व्यवच्छेदनं तदाधानमुत्पादनं तस्य हेतुः मुख्यो जातिः आद्यः पदार्थप्राणप्रदो वस्तुधर्मः सिद्धः जातिः सामान्यं जातेः प्रा
णप्रदत्वं निदर्शयति उक्तं हि वाक्यपदीये गौः स्वरूपेण न गौः नागौः गोत्वाभिसम्बन्धात्तु गौरिति गौः गोपदोद्दिष्टपो
यमस्वरूपेणापि रहितव्यक्तिमात्रेण न गौः नागौः न व्यवहारहेतुः उपाधिरहितव्यक्तिमात्रेण व्यवहारहेतुत्वावच्छे
दच्छेदोपि गोत्वस्य व्यवहारप्रयोजकमाह गोत्वेति गोत्वेनाभिमतः सम्बन्धः समवायलक्षणस्तस्मात् गौरिति व्य
वहारः न च व्यक्तिजातिस्वरूपनिरूपणीयहेतोरिति शास्त्रे ग्रन्थवाक्यलनवः गच्छतीति गमेर्डोरिति सूत्रसिद्धेन गमना
र्थकेन स्वरूपेण गोशब्दो गोपदार्थवाचको न तिष्ठं संपाद्यतामि: नागौः गवयो व्यतिरिक्तस्य गवयस्तोश्वादिपदार्थस्य
वाचकः किं तु गोत्वमेकं पदनेकसंस्थादिसह्व्यक्तिवृत्तिकं सामान्यं तदभिसम्बन्धाद्गौरिति व्यपदिश्यते द्वितीयो
गुणः सिद्धस्य वस्तुधर्मस्य द्वितीयो यो भेदो विशेषाधानहेतुः स गुणस्तं दर्शयति शुक्लादिना हि ल
ब्धसत्ताकं वस्तु विशिष्यते शुक्लः पट इत्यादौ प्रथमं सिद्धं पटपटादिः शुक्ला- नाथमेण रक्तादिपटेभ्यो विशिष्यते वि
वच्छिद्यते द्वितीयं वस्तुधर्मं साध्याख्यं लक्षयति साध्यः पूर्वापरीभूतावयवः क्रियारूपः साध्यो वस्तुधर्मः पूर्वापरी
भूताः प्रथमचरमतो प्राप्ताः अवयवाः अधिश्रयणाद्यवश्रयणान्ता यस्मात्स दर्शितावान् क्रिया पचनादिः तद्रूपः कदा
ख्यातेन प्रकारेणार्थः साध्यक्रियाया मेतत्स्वरूपः तदुक्तं यावत्सिद्धमसिद्धं वा साध्यत्वेन प्रतीयते आश्रितक्रमरूपत्वात्

क्रियेत्यभिधीयते अस्यार्थः ग्रीष्मे ग्रन्थेष्वेव निर्णीयते द्वितीयमुपाधिं व्यञ्जयन् वक्तृयदृच्छया सन्निवेशितं दर्शयति डित्था
दिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं पूर्ववर्णजनितसंस्कारसहितो ऽन्त्यो वर्णो वक्त्रा यदृच्छया डित्थाद्यर्था
र्थेषूपाधित्वेन सन्निवेश्यते इति समासार्थो यदृच्छात्मकः वक्त्रा स्वेच्छया पतनमेतेन नाम्ना व्यवहरामीति यदृच्छे
याडित्थादिशब्देषु डित्थपदाभिधेयेषु डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं यत्नभेदानुपातिनो वा
यवीयाध्ययनप्रतिपत्त्यै इति प्राहुः । स्वपितः स्फोटात्मकमुपाधित्वेन विशिष्टधीविषयत्वेन सन्निवेश्यत इत्यस्य उपाधिः संज्ञा
योयदृच्छात्मकः अत्र शास्त्रसंमतिमाह (डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं पूर्णं जानि) इति गो :
शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिरिति श्रीमहाभाष्यकारः इत्येतेषु हेतोर्थे त्रयोपाधयो नो वा तद्विध्यमन्ता
नः शब्दानामपीत्यर्थः शब्दानां प्रवृत्तिर्जातिजनकता उपाधिवाचकविध्यावलम्बिविषयत्वेनेति भावः ननु परमाणोः परममहान् ए:
परमदीर्घः परमह्रस्व एव रूपाः शब्दस्येति निवर्तनावधानानां जातिशब्दाः एकस्यामेव व्यक्तौ पृथिवीत्वं परमाणुत्वं चेति
परस्परसामानाधिकरण्येन जातित्वं स्यात् तथा चोदयन्तः व्यक्तेरभेदस्तत्त्वं समं कत्वं यथा न तत्त्वास्थितिः रूपत्वादिसं
बन्धो जातिबाधक संग्रहः इति व्यक्त्योरभेदो यथा आकाशादौ तुल्यत्वं यथा घटत्वकुम्भत्वादि एकवचनं यथा तिष्ठ
मणुप्रवेशानादौ सङ्करत्वव्याप्तिर्विधा जातौ रूपत्वादि यथा विशेषं असम्बन्धो यथा समवाये ननु गुणशब्दाः चन्द्रविश
नेत्यधिकत्वापत्तेः नक्रियाः शब्दाः सिद्धत्वात् सिद्धरूपशब्दानां क्रियात्वादिसाध्याकाङ्क्षाह परमाणुत्वादीनां गुणत्वा
यपादानासिभाविकं गुणत्वम् आदिशब्दान्महद्दीर्घह्रस्वानां ग्रहणे गुणेनिरूपरसगन्धस्पर्शसंख्यापरिमाणादी

का॰
टी॰
१३
13

तिस्मश्चगुणानांमध्येपरिमाणस्वरूपाणामनिरूपणान्मानव्यवहारकारणंतत्त्वंनविद्ये अणुमहद्दीर्घह्रस्वेतिमाषपरि
माषपरिच्छेद्गुणत्वमेव अतएवनवत्वविशेषेनराधिकाशंकेतिभावः अथवाविशेषाधायानहेतुर्गुणइतिस्वरूपपरिभाषा
येवंसिद्धेपरमाणवादीनांगुणत्वंतथापिपरमाणुत्वेपरममहत्त्वयोर्वनैकत्वेनस्वाश्रयेविशेषानधि गुणक्रियायस्तुका
नोवस्तुपक्षरूपाणामध्याश्रयभेदाद्भेदइत्यलक्ष्यते गुणादीनामेकवस्वाभाविकोभेदः स्वाश्रयभेदान्तपाथिकस्त
थैः अत्रदृष्टान्तमाह यथैकस्यस्वच्छस्यस्फटिकस्यरक्तनीलाद्यालम्बनभेदात् आलम्बनेप्रतिबिम्बाश्रयणानयथास्वरूपेन
विपर्यीकृतस्वदेहैद्योतिकंघटादिनापिदृश्यतेसत्त्वेनप्रतिपादितेनपराहतज्ञानत्वेनावन्मात्रविलीनाकिंनतदालो
केन सहकारिणाप्राप्तशोभायदास्फटिकस्यमणिरक्तादिकेवस्तुविषयीकृतसेवनीत तदैकरूपमपिस्फटिकप्रतिबिम्बा।
अथएकस्यवस्तुनःसम्बन्धिनादेशेनदीर्घमिवाभाति मकरसौरेवोपरेवोभिन्नतयानानाप्रकारकवर्तनतयाव
र्तितत्व नैलस्यस्थिरत्वनादिनाहिम्याद्वेतिभेदः एवमियतात्मासादीत्वविहत्त्वजातिरेवेतिविहग्णोनि अमेत
हिमरूपःप्राप्तोबाह्याश्रयेषुपरमार्थतोभिन्नेषुशुक्लादिषुयत्रप्रतीतशुक्लाः शुक्लस्मादिषुभिन्नाभिधानप्रमयोमत्तिःत
च्छुक्लादिस्वामान्य हिमादयआश्रयेषुतेननाशुक्लादिगुणेषुपरमार्थतोभिन्नेषुयत्रपीनशुक्लः शुक्लस्मा
दि अभिन्नेपकाराकारमभिधानेनाम यत्रैतादृक्कामीप्रमयोतात्मनहविप्रतिपत्तियावत् नसामान्तिः तथा
बाह्यांकिरणवलाद्युदयेनेन अवहारितिप्रश्नपकाराणांसामान्यमितियदिसामान्येनस्पष्टिवेवृत्तगताकारप्रत्ययोन
स्यात सामान्येनस्पष्टिवेवृत्तगताकारस्वेवगुणेषुसामान्यप्रतिपाद्यक्रियायपद्ध्यक्रुयोयपिप्रतिपादयति गुरुतेतु

लवणाकादिष्वेवमवपाकादिषु बालहस्तेषु काष्ठदीनिनेत्युडित्यादिशब्देषु प्रतिशब्देनाभिधीयमाने इत्यादावभिधेये
वाडित्यादिनमास्ति गुडपाके तु पणाणामितेतु लपाकेन वयवानां विशेषेऽमनपुष्टिर्ल्लामन्निरिति पाकानां भिन्नाका
रत्वेऽपि सामान्यवशात्सामान्यकः पाकान्तरमभिन्नाभिधानप्रसंगयोः सन्ति: बालस्य ह्यसावितिपुडित्यादिशब्देषु स्वरभेदात्सा
पि भेदेनामान्यत्रयाद्यभिन्नाभिधानमसंगतत्वात्ति: चतुर्थः शास्त्रस्य लोकयितयानामेकेल नामेन भिद्यमानेहि इत्यादि भि
धेये सन्ति नित्युडहस्तेवाडित्यादिनेसामान्यमभिन्नाभिधानप्रसंगयोः सन्तीति भिन्नमसन्तीति इति सर्वेषां शब्दानां जाति
रेव प्रवृत्तिनिमित्तमित्याहुः अथ मते सन्ते न संबंधः इमनेन प्रकारेण सर्वेषां गुणादिवाचकानां शब्दानां सामान्य
मेव संकेतानाश्रयतया प्रवृत्तिनिमित्तमित्यपि मीमांसका आहुः एवं मीमांसकमतेन सामान्यस्य संकेतविषयत्वं प्रति
पाद्य नैयायिकसौगतयोरपि मतेनाप्युपन्यस्य पश्यति तत्र तावन्नैयायिकापोहवादी शब्दार्थः कैश्चिदुक्तः कैश्चिन्नैयायिकैः न
ह्यत्र सामान्यवान्विशेषः शब्दस्यार्थ उक्तः जातिमती व्यक्तिः संकेतगोचरस्तदर्थः तथा च जात्याकृतिव्यक्तयः पदा
र्थ इति विवेचितमेतैः वापत्वत्तरैः कैश्चित्सौगतैः गौरियमिति गोत्वानाद्यविप्रहत्ते अतस्माद्व्यावृत्तिरिकादा
श्वादेर्भावनेष्वदर्शनादपोहोऽन्यापोहः प्राह्यार्थसंकेतविषय उक्तः इति गुणकर्मभावयोः स्वकानामन्यपोहगा
वृत्तप्रदर्शितं एवं वाचकस्य शब्दस्य व्याप्यायमाह समस्तोऽर्थस्य वस्तुनो व्यापारो वाभिधीयते अस्तिमात्रात्संके
तितः अथ सति शब्दस्य समस्ता तान्संकेतितोऽर्थः सर्वविश्वादौ सामान्यप्रवृत्तेः सर्वार्थोपजीवनात्प्रथमः तत्र तस्मिन्सत्त्वे
र्थबोधने शब्दस्य प्रवृत्तेः प्रथमो व्यापारोऽभिधीयते अत्र व्युत्पत्तिपदेनानार्थव्यंजनायां लक्षणायां चानिव्याप्तिवारा

का॰ टी॰ २५

णायतथाहि तत्र मुख्यार्थस्य सामीप्यस्थितत्वादर्थो द्वितीयार्थस्य सामीप्यस्थितिः एवं वाचके निर्णीयते। लाक्षणिके च लक्षित
यिष्ठः शक्ये यत्नादजहत्स्वार्थेति लक्षणाद्वयं तन्मूलत्वेन काव्येपि लक्षणा लक्षयति मुख्यार्थबाधे तद्योगे रू॰
ढितोथ प्रयोजनात् अन्योर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया प्रथमं मुख्येनाभिधागम्यस्यार्थस्य बाधे सम॰
न्वयवैलक्षण्या सम्बन्धेनैव सति तत्तद्योगेन सम्बन्धेन लक्षणीयस्यास्यार्थस्य योगे वाप्यर्थेन सम्बन्धे सति रूढितः प्र
सिद्धेः अथशब्दो विकल्पे प्रयोजनाद्वापि पार्थबोधनरूपात्प्रयोजनाद्वा लक्ष्योपि पर्वमेव रूढिप्रयोजने वापेक्ष्य मु॰
ख्येनान्योर्थः यच्च स्वाभाव्यकारणाद्भवति अतः सा आरोपिता मुख्यार्थप्रतीतिव्यवहितप्रतीतिकेर्थे निष्ठा क्रिया
शब्दव्यापारः लक्षणा लक्षणासैतच्च सूत्रं: एतदेव विवृणोति कर्मणि कुशल इत्यादौ दर्भग्रहणाद्ययो
गात् गंगायां घोष इत्यादौ च गंगादीनां घोषाद्याधिकरणत्वासम्भवात् मुख्यार्थस्य बाधे विवेचकत्वात् सामीप्ये च
सम्बन्धे रूढितः प्रसिद्धेः तथा गंगातटे घोष इत्यादेः प्रयोगाद्येषां न तथा न प्रतिपत्तिः तेषां पावनत्वादीनां धर्माणां तथा प्र॰
तिपादनात्मनः प्रयोजनाच्च मुख्येनामुख्योर्थो लक्ष्यते यत् स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा अत्रा
येसम्बन्धायार्थः कर्मणि दक्षत्वाभावे मुख्यस्य यौगिकस्य दर्भग्रहणादेस्तस्य बाधः एको हेतुः ततस्तैश्च दक्षत्व
तासमये विवेचकत्वेन योगः सम्बन्धो द्वितीयो हेतुः तैश्च दक्षत्वप्रसिद्धेः रूपे प्रतीतिस्तृतीयो हेतुरित्येवं हेतुत्रयेणास्मुद
तेन मुख्याद्दर्भग्रहणाद्यर्थाद्दमायादक्षत्वार्थोतिष्ठः शब्दव्यापारो लक्षणेति पर्यवसिते तथा गंगायां घोष इति प्रयो
गेन लक्षणायामजहत्स्वार्थाभिधायां गंगाशब्दाभिधेयस्य मुख्यार्थस्य स्रोतोरूपस्य तटे समूहायाभावास्सम्भवा

हायस्मा घोषेत्रः ततो गंगापदस्य प्रवाहस्य नेतलक्षणेन तटे तयोगः सामीप्यसम्बन्धो द्वितीयः प्रयोजनस्य शैत्यपावा
नत्वादेः घोषे लाभस्तृतीयः इत्येवं सम्बन्धिनो विशिष्टे तत्र भिधेयत्वाभावात् अभिधा व्यापारो नेहत्वादर्थादस्या गंगायां तटे घोष
इत्यर्थः प्रतीयते सम्प्रयोगस्तो नोपादानार्थप्रतीतावबहितावाप्रतीतिर्येसेतादृशस्य सावधीत्यलक्षणत्वमि
ष्टः प्राहस्वापावोलक्षणेति सिद्धं प्रयोजनवतीलक्षणां विभजति स्वसिद्धये पराक्षेपः परार्थस्वसमर्पणं उप
दानेलक्षणेत्युभयाक्षेपेवमाद्विधा स्वसिद्धयेस्यात्मीयार्थस्यान्वयसिद्ध्यर्थं पराक्षेपः परस्याक्षेपो नरवाच्या
र्थाक्षेपः उपादाने भवति परार्थं परकीयस्यार्थस्यान्वयसिद्ध्यर्थं स्वसमर्पणं स्वार्थोपस्थापने लक्षणा भवति
स्वार्थं परकीयस्यार्थं चपलः समर्पयेत् अनेन प्रकारेण लक्षणा स्वार्थोपरित्यागेन परार्थोपलक्षणा
इत्येवं लक्षणेति द्विधा शुद्धे द्वेपवारहितत्वे इत्यर्थः अत्र क्रमेणोपादानलक्षणां विवृणोति कुन्ताः प्रविशन्ति
यष्टयः प्रविशन्तीत्यादौ कुन्तादिभिरात्मनः प्रवेशसिद्ध्यर्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते तत उपादानेनेयं ल
क्षणा अचेतनानां कुन्तानां प्रविशन्तीति क्रियायामन्वयासम्भवात् परेषां पुरुषाणामवाच्यानां कुन्तसंयुक्तानां च
तनानां पुरुषाणामाक्षेपणात् इत्ययमर्थः अत्र च कुन्तानां पुरुषोपलक्षणार्थतावाप्येकुन्तग्रहणं योगात्पुरुषाणां कुन्तानि
गहनतादिप्रयोजनं तया लक्ष्यमानमित्यर्थः इयमजहत्स्वार्था गौरनुबन्ध्य इत्यत्र गोशब्दस्य जातिवाचकस्य
त्वेय क्रिययानेतदोषेणान्वयासम्भवात् जातिमती व्यक्तिराक्षिप्यते इत्ययमुपादानलक्षणेति केचिदाहुः तद
वहेघपति गौरनुबन्ध्य इत्यादौ श्रुतिचोदितमनुबन्धनं कथं मे स्यादिति जात्या व्यक्तिराक्षिप्यते न तु शब्देनोच्यते

विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे इति न्यायात् नाम्ना व्यक्तिर्न लक्ष्यते शुक्ल्या प्रतिपाद्यते न तत्र शु
क्लेतोच्यते सा तदा नास्केतिनेन नाभिधीयते पुनर्द्वितीयपादयति विशेष्यमित्यादि विशेष्यं व्यक्तिरूपमभिधा न गच्छे
त् न बोधयेत् अत्र हेतुमाह विशेषणे अस्मिन् विशेषणे जातौ जातिबोधने इति यावत् क्षीणशक्तिः पर्यवसन्ना
विशेष्येन शक्तिः अपि तु जातावेवेति भावः इति न्यायात् एतस्यकारयुक्तेः इत्युपादानलक्षणा नोपदाहर्तव्या न
त्वप्रयोजनमात्रेण वाच्यतिवियत् इत्येवमुक्तेः गौरनुबन्ध्य इत्यत्रोपादानलक्षणा नोदाहर्तव्या अत्रा
हेतुमाह नह्येवमित्यादि श्रुतार्थवाक्यस्याप्रयोगः इत्येवं प्रयोजनेनैवान्तरं यत्नमविदितं हेतुर्न व्यक्तमिति
भावः एवं जातेराक्षेपेण सम्भवतो व्यक्तेरुपादानमित्याह व्यक्त्यविनाभावात् जात्या व्यक्तिराक्षिप्यते य
था क्रियतामित्यत्र कर्मप्रविशापिण्डीमित्यादौ देहमतयेति व अविनाभावस्यापि राक्षिप्यते अत्र माप्य
तेनत्याह जातिर्व्यक्तिमतो जातित्वात् यत्र यत्र जातिस्तेन तत्र व्यक्तिमित्तमपि न विनाभावः अविनाभवस्य
वानुमापकत्वे दृष्टान्तमाह यथा क्रियतामित्यादि क्रियतामित्यत्र कर्तृक्रिययोरविनाभावेन कर्त्तानुमीयते
प्रविशेत्यत्र कर्मक्रिययोरविनाभावेन कर्मानुमीयते पिण्डीमित्यत्र क्रियाकर्मणोरविनाभावेन क्रियानुमी
यते यथा तथा जातिमतो व्यक्तेरनुमीयते इति भावः पीनो देवदत्तो दिवा न भुङ्क्ते इत्यादौ दिवाभोजनाभावः पी
नो देवदत्तो दिवा न भुङ्क्ते इत्यादौ दिवाभोजनाभावः पीनत्वेनान्वयसम्भवान्न बाधः समर्थरात्रिभोजनं स्वमा
मर्थ्यनीति केचिल्लक्षणामाकुर्वन्ति पीनो देवदत्तो दिवा न भुङ्क्ते इत्यादौ रात्रिभोजनेन लक्ष्यते श्रुतार्थी

पत्तेरर्थापत्तेर्वाऽनन्यविषयत्वात् तल्लक्षणे लक्षणया समबोध्यते । किं तु श्रुतार्थापत्त्या वा दृष्टार्थापत्त्या वा बोध्यते । अ-
यमर्थः । तथा वाक्ये दृष्टः श्रुतो वार्थोऽन्यथा नोपपद्यते इत्यर्थान्तरकल्पनमर्थापत्तिः सा द्विधा दृष्टार्थापत्तिः श्रुतार्थाप-
त्तिश्चेति श्रुतार्थापत्तिः स्वयमनुपपद्यमानः शब्दः शब्दान्तरं कल्पयति यथा पीनो देवदत्तो दिवा न भुङ्क्ते इति वा-
क्याद्रात्रौ भुङ्क्ते इति वाक्यैकदेशकल्पना । तथा च दृष्टार्थापत्तेर्वेति दृष्टार्थापत्तिः परं दृष्टो वेत तथा च दृष्टार्थान्तरेऽपि लक्ष-
णं यत्रार्थोऽन्यथानुपपद्यमानोऽर्थान्तरं गमयति सा दृष्टार्थापत्तिः यथा च पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र सा ना-
दभावप्रमाणेन भोजनाभावप्रतीतिः पीनत्वं तु श्रुतेन तु भोजनसद्भावोऽपि प्रतीयते न चैकस्य युगपदेकत्र भावाभावौ
तयोः सद्भावस्थानविरोधात् इत्यनुपपद्यमानोऽयमर्थः पीनस्य रात्रिभोजनं गमयतीति नैवैवं गौणदृष्टान्तोऽर्थाप-
त्तिदृष्टार्थापत्त्युदाहरणानि अथ लक्षणालक्षणं दर्शयति गंगायां घोष इत्यत्र तटस्य घोषाधिकरणतासिद्धये
गंगाशब्दः स्वं समर्पयतीत्यवमादेर्लक्षणेनैव लक्षणा गंगाशब्दः स्वार्थं तटं समर्प्य स्वात्मानं रूपमर्थं स्वाभिसन्नते
सर्थः लक्षणेन स्वार्थपरित्यागाविशिष्टेन परोपलक्षकेन प्रमत्ताकुदर्शितं शुक्ले इति विवृणोति उभयरूपा
चेयं शुद्धा उपचारामिश्रत्वात् उपचारो वक्ष्यमाणः सादृश्यादिनाऽमिश्रत्वात् नैविनेव प्रतीयमानत्वात् ननु कु-
न्ताः प्रविशन्ति गंगायां घोष इत्यादि शुद्धोदाहरणे लक्ष्यलक्षकयोर्भेदमात्रप्रतीतिः वक्ष्यमाणे गौर्वाहीक इत्यादौ ।
गौणीलक्षणोदाहरणे गोवाहीकयोरभेदप्रतीतिरिति भेदाभेदावेव शुद्धगौण्योर्लक्षणयोर्वैधर्म्यापादकताऽऽदे
कोऽकिमुपचारामिश्रत्वेनेत्याशंक्याह अनयोर्भेदयोर्लक्ष्यलक्षकस्य तन्नभेदरूपं तटस्थत्वे समवेयाविवक्षणात् अ-

१क

का° टी° १६
16

नयोः शुद्धाभेदयोरुपादानलक्षणयोस्तटस्थत्वेन लक्ष्यलक्षकयोर्न भेदाभेदौ दर्शितौ । तथाहि कुन्तः पुरुषयोः स्तो-
तस्तटयोर्वा न भेदप्रतीतिः भेदवाचकविभक्त्यभावात् नाप्यभेदः योग्यताविरहादिसंबंधो दर्शितौ स्तः नभेदरूपे-
गौणलक्षणावैधर्म्यप्रतिपादकेनास्ति संबंधाविवक्षणात् गंगाशब्देन तटप्रतिपादनेन गंगाशब्दः प्रतीयत इति स्वा-
विवक्षणात् गंगाशब्देन तटप्रतिपादनेन गंगाशब्दः प्रतीयत इति स्वसाविवक्षणात् न गंगाशब्दः तटसम्बन्धमात्रप्रयो-
जनाय प्रतिपादने किंतु हि शैत्यादिप्रयोजनायेति एतदेव दर्शयति तटादौ तावत् गंगादिशब्दैः प्रतिपादनेन तत्प्रतिपा-
द्यो हि प्रतिपादयितृप्रयोजनसंप्रत्ययः तटादौ तावल्लक्षणा गंगादिशब्दैः स्वार्थैः प्रतिपादने क्रियते प्रथममेव गंगा-
पदात् स्रोतोरूपेण गंगायाः स्मृतिः ततो योग्यार्थान्वयकरणतां शक्याया सामीप्यसंबन्धवत्त्वात्तेन ततः सम्बद्धान्वितेन तटस्य
लोकाभिप्रायस्थितिः ततो गंगातटयोः सम्बन्धात्स्रोतस्तटयोरभेदज्ञानेन शैत्यपावनत्वादिप्रतीतिरिति क्रमविशेषेण क्रमसमत-
पत्तेः प्रतिपादनसमकालमेव तत्सम्बन्धात् स्रोतोरूपेण तटाभेदस्य प्रतिपत्तौ सत्यां अनन्यथा प्रतिपादयितृविवक्षि-
तशैत्यपावनत्वादेः संप्रत्ययः सामीप्यसंबन्धमात्रप्रतीतौ तु गंगातटे घोष इति गंगाशब्दाभिधानात् लक्षणायाः को-
भेदः न पुनरर्थादि गंगाशब्देन तटस्य सम्बन्धमात्रार्थमेवोपादीयते न तु शैत्यादिप्रयोजनार्थं तथाहि गंगातटे घोष इत्यत्र स्व-
शब्दाभिधानादभिधायाः सकाशात् लक्षणायाः को भेदः को विशेषः शैत्यादीनां तटोपादानादेव प्रतीतौ न तु गंगाश-
ब्दोपादानान्नहि लक्षणा किमर्थमनुपादीयत इति भावः एवं शुद्धां लक्षयित्वा गौणीं लक्षयति सारोपान्या तु यत्रोक्तौ
विषयी विषयस्तथा यत्र यस्य समाख्यानं बाधादिहेतोर्नचयुक्तायां लक्षणायां गौर्वाहीक इत्यादौ विषय्यारोप्य

मारोपे भवादित्यत्र विषय आरोपाधिकरणं वाहीकादिस्तथोक्तौ समानविभक्तितया स्वस्वशब्देनोपात्तौ साऽ८
माघ्नुद्वेन तयोर्गौणे सारोपा नाम । न च शब्दउपादानलक्षणाऽ निरूढत्वविवक्षेदकः वैधर्म्यप्रतीतेन तयोरपि
मानाधिकरण्येन निर्दिष्टे सा लक्षणा ह्येषा प्रयोगः आरोपः एतदेव सम्याविवरणेति आरोप्यमाण आरो
प्यविषयस्य यत्रानपह्नुतभेदो सामानाधिकरण्येन निर्दिष्टे सा लक्षणा सारोपा अनपह्नुतभेदो गरहीनवैय
र्म्यौ सामानाधिकरण्येन भेदोपस्थापकविभक्त्यन्तताभावेनैकविभक्तिनिर्देशेन सम्बन्धः विषय्यन्तःकृतेन्यस्मि
न् सा स्यात्साध्यवसानिका विषयिणा आरोप्यमाणेनान्तः कृते निगीर्णेऽन्यस्मिन्नारोपविषये सति सा स्यात्साध्यवसा
ना आरोप्यमाणेन गवादिना निगीर्णाभिदेनानुपस्थिते आरोपविषये वाहीकादौ सति गौरयमित्यादिरूपलक्षणा
णा साध्यवसाना नाम । तथा चालंकारिकेऽध्यवसानस्य स्वरूपमुक्तं अध्यवसानं तथा चालंकारिकेऽध्यवसा
नस्य स्वरूप यस्य हि विषयनिगरणे विषयिनिश्चयस्य स्वरूपं सर्वार्थविधः स्वात्मसिद्धउमादित्तस्य । तत्रेदं ततः
सिमादौ स्वात्मके विषयानवगमएव नत्ववगतस्य शुक्तिकास्वरूपस्य प्रमातः कदाचिदपि जनतापिदमितिभ्रमा
योमाद्दः स्यात् कविप्रतिभाकल्पितेन गौरयमित्यादौ विषयस्यावगम्यमानेन तत्र बैभावाद्यतिपत्तौ साध्यौ न विकल्प
नायानेवविषयविनिर्गीर्णत्वे विषये तत्प्रयोजनमपरे तत्र तया विषयिणाम्ध्यवसितेति एवं ये भेदयोर्गौणत्वे शुद्धत्वे
वाह भेदाविमावाह सादृश्यात्सम्बन्धान्तरतस्तत्र लक्षणा गौणी शुद्धा च विज्ञेया इमे सारोपसाध्यावसाने द्वे भेदौ ल
क्षणाविशेषौ सादृश्यात्सादृश्यहेतुके गौणी विज्ञेयौ कार्यकारणभावादिसम्बन्धान्तरहेतुके तु शुद्धे विज्ञेये

का॰
टी॰
२
17

पतेदेवमन्यथाविहन्यतेति इमावारोपाध्यवसानरूपौ सादृश्यहेतू भेदौ गौर्वाहीक इत्यत्र गौरयमित्यत्र च गौर्वाहीक
इत्यत्रारोपणाद्गौरयमिति सर्वनामपदेनोपादानादारोपविषयस्तेनारोपेण न साध्यवसानता यच्च गोपदं सादृश्यपल
क्षणमभेदेनवाहीके लक्षयति अभेदावगमादिप्रयोजनं तेन तु छेमनागम्यमिमसंक्षेः अत्र सादृश्यसम्बन्धमेवति
मतमभेदेनोपस्थापयति अत्र स्वार्थसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने
प्रवृत्तिनिमित्ततामुपयान्तीति केचित् गौर्वाहीक इत्यादौ स्वार्थसहचारिणो गोसमानाधिकरणा गोमस्त्वपि
नयन्ति यावत् जाड्यमान्द्यागुणादयो लक्ष्यमाणा अपि मातादृक्कनाहलक्षणया बोध्या अपि गोशब्दस्य परार्थाभि
धाने परस्य वाहीकस्यार्थाभिधानेभिधानस्यावोधेत प्रवृत्तिनिमित्ततामुपयान्तीति प्रवृत्तिनिमित्तो भवतीति केचिदा
हुः अत्र गोशब्दस्य वाहीकार्थाभिधाने नाभिधाव्यापारः सादात्म्यकेनस्याद्वादिति नैतद्योग्यमिति पूर्वमतेनाप
मेदकमतेन स्वमाहुः स्वार्थसहचारिगुणाभेदेन परार्थगता गुणा एव लक्ष्यन्ते न तु परार्थोभिधीयत इत्यस्य स्वा
र्थसहचारिणो गोसम्बन्धिनो गुणा नो जाड्यमान्द्यादीनामभेदेन सारूप्येण परार्थगता वाहीकगता गुणा जाड्याद
य एव लक्ष्यन्ते न तु परार्थो वाहीकार्थोभिधीयते ऽभिधाबोध्यन्ते इत्येष पूर्वस्माद्विशिष्टा बुधा आहुः नन्वगोश
ब्दाद्वाहीकार्थः प्रतीयते वा न वा प्रतीयते चेत्किं गोशब्दादेव किं वा लक्षिताद्गुणादविनाभावस्तु वेति न तावद
द्यो गोशब्दस्य तत्रासंकेतितत्वात् नापि द्वितीयः शब्दाकांक्षा शाब्देनैव पूर्यते न त्वर्थेनेति न्यायेनाविनाभावल
भ्यस्यार्थस्य शब्दाप्रवेशात् ग्राह्येऽन्वये न च तत्र प्रतीयते इति मतमोपनमेभवति यतो गोशब्दाद्वाहीकार्थो न प्रती

यते इति मतमपि न सम्यग्भवति यतो गोशब्दाद्वाहीकार्थो न प्रतीयते तदा स्य गोशब्दस्य गोर्वाहीक इति वाक्ये सा
मानाधिकरण्यमेव विरुध्येतेत्यादि निगदव्याख्यानमपि मतमनुपमर्दं लक्षितज्ञानमनुपपत्त्यापादयति साधारण्य
ण्याश्रयेण परार्थपर्यवसानेन स्वार्थे गोशब्दो यावत्स्वात्ते न संसर्गं वाहीकशब्देनान्वयमलभमानः जाड्यादि
समानधर्मसंबन्धाद्वाहीकार्थं लक्षयति वाहीकस्य गोभिरभेदादेतेनाध्यवसायः प्रयोजनमिति भा
वः अत्रापि ग्रामेऽपि समस्तं दर्शयति उक्तं चात्र अभिधेयाविनाभूतप्रतीतिर्लक्षणेष्यते लक्ष्यमाणगुणै
र्योगाद्वृत्तेरिष्टा तु गौणतेति अभिधेयेन सामान्यकेतिनार्थेनाविनाभूतासंबद्धा प्रतीतिर्यस्याः सा लक्षणा दृष्टा
हीति लक्षणेष्यते लक्ष्यमाणस्य वाहीकादेर्गुणैर्जाड्यादिभिर्योगाद्धेतोर्लक्षणा गौणीत्येष्टा एतदेव हा
मा विवेचयति अविनाभावोऽत्र संबन्धमात्रं न तु नान्तरीयकत्वं अत्र लक्षणायामविनाभावपदेन यः कश्च
न संबन्धः संयोगादिरुक्तः न तु नान्तरीयकत्वं समवायो विनाभावो व्याप्तिरित्यर्थः अत्र हेतुमाह न त्वे हि
मञ्चाः क्रोशन्तीत्यादौ लक्षणा न स्यात् व्याप्तिश्चेद्विवक्षिता स्यात् मञ्चपुरुषयोस्तयोर्व्याप्त्यभावादस्य वाक्ये लक्ष
णा न प्रवर्तेतेति भावः व्याप्तौ लक्षणानुपयोगमाह अविनाभावे वा तेनैव सिद्धे लक्षणाया नोपयोगः
इत्युक्तं अविनाभावेनाक्षेपेणाक्षेपस्य अग्निर्धूमवत्त्वादेर्व्याप्तौ सत्यामापत्तेरेवानुमानेनैव सिद्धे लक्षणाया नो
पयोगो न प्रयोजनमित्युक्तं च ग्रन्थकृद्भिः एवं गौणभेदद्वयमुक्त्वा शुद्धभेदावुदाहरति आयुर्घृतमायुरेवेद
मित्यादौ सादृश्यादन्यत्कार्यकारणभावादिसम्बन्धान्तरं हेतुः सकारणस्यायुःकार्यमिति कार्यकारणभाव

कस्मादायुर्घृतमितिसमारोपः । आयुरेवेदमितिसाध्यवसानम् । एतदेवसमाह । एवमादौकार्यकारणभावादिलक्ष-
णंस्वैवयत्पूर्वंसमारोपाध्यवसाने कार्यकारणभावादिलक्षणोस्त । स्वरूपोपपन्नाहंकारेवयःपूर्वप्रथमेयत्रतथारोप-
ह्वेचनादयः प्रमातारस्तदभेदेन स्वात्मनि प्रतिपद्यन्ते उत्साहादिसमुद्बोधः साधारण्येन रसादिरूपेण परिणमन्तीय॰
ते तद्विभावादीनां साधारण्येन प्रतीतौ सामाजिकस्य देवतायाः सीतायाः सम्भोगोक्तावपि रसालम्बनविभावत्वेक
त्वेन सामाजिकानामप्रतिष्ठापत्तिः सर्वे कामोपाग्राः सीतादिशब्दाः परिहृत्य जनकात्मजत्वादिविशेषाः कामि॰
नीमात्रवाचकाः सामाजिकरतेर्विभावार्थं तेनाकाविदितिश्च तदुक्तं यो रौद्रादयस्य वस्थानो रामादिः प्रतिपादकः
विभावयति रसादीनुक्तं देते रसकस्येति इति प्रथमार्थः नहि कवयो योगिनः स्वचक्षुषा न वदन्ति तास्वाभाविकीरामा
दीनामवस्था इति हासवत्त्रिबध्नन्ति किन्तु लोकसाधारण्येन स्वाभिमतया सन्निहितीकृतनायकरीतादावस्थाश्च अहो
त्वितिनापवापरिस्फुरत्तद्विशेषाः सहृदयैः नन्वेवं सीतादयादयसंकलसर्वस्वरूपविशेषाः स्त्रीमात्रवाचकाः एव
सामाजिकरतेर्विभावास्तर्हि किमर्थमनुपादीयन्ते इत्याशंक्याह समाहितमेवात्राभियुक्तैः क्रीडतो मृगनायकस्यैव बालातो॰
ऽग्निरदादिभिः स्वोत्साहः स्वदतेतस्तथा लोकानामज्ञेनादिभिः अत्रैतदुक्तं नहि कोऽपि लौकिकशृङ्गारवत् सीतादिवि॰
भावादीनामुपयोगः किन्तर्हि लोकविलक्षणेन प्राक्सृतिपादितप्रकारेण नटत्वमियतापि यतः रसादेर्विभावादि

संयोगस्काराप्रकाशतो ऽस्याप्रकाशस्य सिद्धिस्सैव संभवतीति सिद्धत्वमेवाविरुद्धं दर्शयति सामाजिकानां वा-
सनात्मतया स्थितस्तत्पूर्वोऽनुभूतः संस्कारो हि वासनाख्यो वानादिः यज्जातीयस्य कर्मणो विपाकस्तदनुगुण-
तया प्रकाशते ऽस्य तस्मादेतासामपि पूर्वानुभूतेः संस्कारस्वरूपेण वासनात्मकत्वमेवानादित्वेन तद्वासिद्धत्वपर्यायस-
वेण तेन च विभावा दिसंयोगाद्विपाकानुगुणत्वात् स्वप्रकाशनावस्फुटे वर्तमानायाश्च वासनानां स्वप्रकाशत्वमसाव-
एवं व्योगशास्त्रेऽपि ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानामिति तस्य शृङ्गारहास्यादिमिश्रत्वेन त्रिविधस्य
कर्मणो यो विपाकस्तदनुगुणानां नामावनादित्वमाशिषो नित्यत्वात् इदं मे भूयात् इदं मे भूयादि साशास्सनातना
प्राणिमात्रस्य सर्वस्य सर्वदा दृश्यते ऽत एव स्वाभाविकं जातमात्रस्याननुभूतभाविमरणस्य पंसोऽहं द्वेषः वानुस्मृतिहे-
तुः कथं मरणत्रासो भवेत् न च स्वाभाविकं निमित्तमपेक्षते तस्मादनादिवासनाभिर्विद्धमिदं चित्तं कर्मविपाक
निमित्तवशात् काश्चिदेव वासनाः प्रतिलभ्य पुरुषस्य भोगायोपवर्तते इति तस्मात्सिद्धमिदं यदनादिरसाख्या वा-
सनावतः सहृदयाः सामाजिकास्तेषामेव विभावादिसंयोगात्काव्यनाट्ययोरभिर्भवति नेतरेषां वासनादीना-
श्रोत्रियादीनामिति तथा चोक्तं सवासनानां सभ्यानां रसस्यास्वादनं भवेत् निर्वासनास्तु रङ्गान्तः काष्ठकुड्याश्म-
संनिभा इति एवं विभावादीनां साधारण्येन स्ववासनात्मकतया स्वप्रकाशत्वमखण्डत्वं च प्रतिपाद्य प्रमातृवैल-
क्षण्येन तस्य रसादिना सहाभेदापत्तिमाह नियतप्रमातृगतत्वे स्यादित्यत्र कार्यानुकर्त्रोः प्रागेवापाकरणान्नियतः र-
सचर्वयन्तत्तया निश्चितश्चासौ प्रमाता सामाजिकस्तत्तत्त्वेन स्थितोऽपि साधारण्योपायबलात् साधारण्येन सर्वेषा-

का॰ टी॰ ३२ त्वनिष्ठत्वासाधारणयोर्ममैवैते शत्र्वादिविकल्पोल्लिखि विभावादिचिन्तनव्यापारः तस्य बलादुद्रेकात् तत्कालसम्भवोऽयमम
विगलितत्वासौ परिमितप्रमातृभावः उद्दमहे एवमवतिन्मुणोमीति अश्वत्थत्वात् मेवेयुः तत्परवशादुन्मिषितः
प्रादुर्भूतः वेद्यवेदकयोः साधारण्याद्वेद्यान्तरसम्पर्कशून्यः अपरिमितभावः सर्वव्यापित्वं यस्य तेनादृशेन प्रमात्रा
37 नन्वेवात्मविशेषस्य रत्यादिविशेषस्य सत्त्वात्कार्यविशेषस्य सम्बन्धित्वविशेषस्य विशेषस्य चाग्रहणात् साधारण्येन स्वाका
र इवाभिन्नोऽपि गोचरीकृतः ज्ञेयत्वात्तत्तानानाभेदेऽपि यथा साकारज्ञानवादिमते इदमहं जानामि जानामीत्यत्र ज्ञा
नामीति क्रियाया व्याप्यत्वात्तस्येदमिति कर्मवाच्यस्य ज्ञेयस्य विषयस्याहमिति कर्तृवाच्यस्य ज्ञातुश्चाभेदेऽपि यथा
र्थाविषयविषयिभावस्तद्वत्स्यापि वेद्यान्तरसम्पर्कशून्यत्वेन गोचरीकृतः विषयीकृतः तथा चर्व्यमाणतैका
र्यत्वानुमेयत्वाभावात्तद्विलक्षणत्वात्स्य प्रमाणातीतत्वेनालौकिकः प्राणः स्वरूपसिद्धिर्यतेयस्य तदुक्तं तस्मादलौकिकः स
स्वेद्यः सहृदयैरयम् प्रमाणं चर्वणैवात्र साभिन्नैर्विदुषां मते तथा विभावादिजीवितावधिः विभावाद्यज्ञा
नस्य जीविते कार्यकारणतादिपरित्यागेन सहृदयालम्बनतात्मकः प्रतिभासप्रकारावधिः परिपाकसीमा यस्य सः
सति तावद्विभावादिसहृदालम्बनैकप्रतिभासे रसोऽनस्यादिसद्भिः अत एव पानकरसन्यायेन चर्व्यमाणः यथा
पानकरसे खण्डमरिचादिसहृदात्मकोऽखण्डादिव्यतिरिक्तः कश्चिदपूर्व एव स्वादः तथा विभावादिसंयोजनादि
हापि स्वर्थः तदुक्तं कार्यकारणसहचारिरूपाण्यपि हि लोकतः रसोद्बोधे विभावाद्याः कारणान्येव ते मताः प्र
तीयमानः प्रथमं प्रत्येकं हेतवः कथ्यन्ते ततः संमिलिताः सर्वे विभावाद्याः सचेतसाम् प्रपानकरसन्यायाच्चर्व्य

माणो रसो भवेत् विभावाश्चानुभावश्च सात्त्विका व्यभिचारिणः प्रतीयमानाः प्रथमं खंडशो यांति संविदं ततो एत्तु
सर्वं तत्र रसास्वल्लक्षणमुक्तावर्वणादिप्रतीतिस्वरूपमाह प्रबन्धपरिस्फुरत्त्विमादि अत्र स्फुरणादीनां स्वरूपमीण
मन्हेत रसोऽपचारादिवशाद्ध्रप्रयोगः अन्नास्वादमिवेम्नल मा किंदृशायो ब्रह्ममात्रमेव स्वास्वादेन विभावादिभि
गमीयंतिभेदादिवशाद्ध्रप्रयोगः अत एवाह अलौकिक इति लोकेष्वदृष्ट अलौकिकश्चमत्कारो विस्मयस्त
दीयस्यादिः स्मादिशब्दाद्हासशोकादिग्रहणं स्मादिः स्थायिभावो रसो भवतीति सबन्धः एवं रसस्य लक्षण
मुक्तास्वरूपमाह न च कार्यो विभावादिनाशे हि तस्य सम्भवप्रसंगात् नापि ज्ञाप्यः सिद्धस्य तस्याभावात् अ
पितु विभावादिभिर्व्यंजितश्चर्वणीयः कारकज्ञापकाभ्यामन्यत्क्व दृष्टं न क्वचिद्दृष्टमित्यलौकिकत्वप्रसिद्धेर्भू
षणमेतन्न दूषणं चर्वणानिष्पत्त्यातस्य निष्पत्तिरुपचरितेति कार्योऽप्युच्यते लौकिकप्रत्यक्षादिप्रमाण
ताटस्थ्यावबोधशालिमितयोगिज्ञानवेद्यसंस्पर्शरहितस्वात्ममात्रपर्यवसितपरिमितेतरयोगिसंवेदविल
क्षणलोकोत्तरस्वसंवेदनगोचर इति प्रत्येयोऽभिधीयते तद्ग्राहकं च न निर्विकल्पकं विभावादिविमर्शप्रधा
नत्वात् नापि सविकल्पकं चर्व्यमाणस्यालौकिकानन्दमयस्य तस्य स्वसंवेदनसिद्धत्वात् उभयाभावस्वरूपस्य
चोभयात्मकत्वमपि पूर्ववल्लोकोत्तरतामेव गमयति न तु विरोधं इति श्रीमदाचार्याभिनवगुप्तपादाः आस्मात
स एव विभावादिज्ञानेरतिसाध्यो हि रसो भवति यदि विभावादिज्ञानकार्यो रसः स्यात् न हि कारणज्ञानं तत्कार्य
ज्ञानेन युगपद्दृश्यते न च प्रतीतिकाले विभावादिज्ञानेनोल्लसेत न हि चन्दनस्पर्शज्ञानं तज्जन्यसुखज्ञानेनैक

दृ=१ न

पाश्चे न = ३

का. दास्भवतीति नापीतिष्यर्थैमिद्धाप्यवघटादयोदीपैस्तीपकेत्तीष्यते न हि वे विभावादिभिः प्राग्रसासिद्धो विभावा-
टी. दिसमूहालम्बनात्मकादेवास्य इत्यर्थः कथं तर्हि भवतीति विभावादिसंयोगाद्रसनिष्पत्तिरित्युक्तं प्रसंगं प्राहेतन्न म-
२८ म्भोनित्यत्वाभावादाह अपीति व्यञ्जकव्यञ्जकभावेनात्र हेतुत्वमित्यर्थः एतदेव विवृणोति कारकेति सृष्टे।
28 कार्यताभावे रसनिष्पत्तिरिति सूत्रसंगतिः कथं कथं वा ज्ञाप्यताभावे रसः प्रतीयते इति व्यवहारस्तस्याश्रयमा-
ह चर्वणानिष्पत्त्येति विभावादीनां विमर्शात्मकरूपप्रास्वादो हि चर्वणा सा च विभावादिसमूहालम्बनात्मा सा च
वेति निष्पत्तिः कार्यत्वमुपचरितम् एतेन पद्यमानात्वारोपितमिति हेतोः कार्यत्वमुक्तो कार्यत्वेन व्याक्रियतामित्य-
र्थः ज्ञाप्यत्वव्यवहारमाह लौकिकप्रत्यक्षादीति लौकिकव्यवहारादिसाधनकर्षजन्यप्रत्यक्षादिप्रमाणेन यत्र
स्माद्विलक्षणं वर्तते तथा नाट्यरूप्येन वेद्यवेदकरूपेण मितेनावबोधयोगजन्यमप्रत्यक्षमतीतानागतसर्ववि-
षया नोप्रकाशः तेन प्रालितोयमितः योगिनः सम्यग्वधुक्तिः सम्यग्ज्ञानाज्ञानाप्रहृत्तवो योगिनस्तेषो यन्त्रा-
तेवेद्यवेदात्मके तस्माद्विलक्षणं वर्तते तथा वेद्यस्पर्शरहितस्वात्ममात्रपर्यवसितेन वर्तते परिमितेन रयो-
गिनो समाधिदशायां सम्यग्युक्तिज्ञ सर्वास्तमिथ्याज्ञानानो संवेदने सम्यग्वेदने विनाशितसर्ववासनेत्तालेता-
स्माद्विलक्षणं वर्तते अतएव लोकोत्तरं वर्तते स्वसंवेदनेन स्पर्शगोचरत्वमतो हेतोः प्रतीयत्वात् ज्ञाप्यमिथ्यायतां-
मभिधाया स्वाद्यव्यापारेण साक्षात्मकेनेनवोध्यतां न तद्रूपचारेणेत्यर्थः अत्र रससंवेदनस्य मानसत्वेन प्रत्यक्षा-
दिप्रमाणव्यवहारादिसंयोगजादिलक्षणंपरिमितयोगिज्ञानाद्वेद्यवेदनाद्विगलितवेद्यान्तरत्वेन विशेषः परिमि-

तेन च योगिसंवेदनादिनापि न सर्वथा स्मरणादिवासनामयत्वेन भेदः तत्र ग्राहकमिति इन्द्रियार्थसन्निका-
र्षमात्रेण ज्ञायमानेन नामजात्यादिविमर्शशून्येन हि निर्विकल्पस्य स्वलक्षणविभावादिविमर्शेन प्रधानः कथं तत्र
त्वित्यर्थः नापीति नामजात्यादिविशेषणविशेष्यावगाहिना तेन हि सविकल्पकेन सम्यक् स्वसत्तया प्रकाशस्य वि-
भावादिभिः सह तद्विशेषणविशेष्यभावस्येत्यर्थः उभयाभावेति निर्विकल्पकत्वाभावः सविकल्पकेस-
विकल्पकत्वाभावो निर्विकल्पकाभिसंवेदप्रकारेण उभयाभावरूपस्याप्युभयात्मकत्वे लोकप्रविरुद्धे न तत्र स-
इत्यर्थः इतिश्रीमदिति विभाव एव तेषामिति सम्बन्धः तथा च वृद्धमालोकलेशस्य श्लोके शाहमथ्यमाण हृदयस-
वादग्धप्रज्ञापातनस्येत्यनुभावाः शृङ्गारस्यैव करुणभयानकयोः रुद्रविभावानुभावसमुदितत्वं प्रगल्भितविशे-
षादिवासनाः तु रागादयः क्रमात् स्वसंविदानन्दरूपत्वेनाप्यापारमनीयरूपा स्मशानिवन्धयदि विभावानुभावव्यभि-
चारिसंयोगाद्रसनिष्पत्तिरिति हि केकस्यैवानुभावव्यभिचारिणोरिति विभावानां सम्बन्धः आह व्याघ्रादयो वि-
भावा भयानकस्यैव वीराद्भुतरौद्राणां अश्रुपातादयोऽनुभावाः शृङ्गारस्यैव करुणभयानकयोः चिन्तादयो-
व्यभिचारिणः शृङ्गारस्यैव वीरकरुणभयानकानामिति पृथगनैकान्तिकत्वात् समुद्धयोर्मिलितानां निर्देशः विभा-
वादीनां पृथक् पृथगनिर्देशे त्वप्रयोजकत्वात् एकस्मिन्नेव रसे साक्षात्प्रमायाः कारणत्वप्रसङ्गात् मावमसाधिदर्शितात्
नैकान्तिकत्वेप्यनपेक्षत्वादविप्रतिपत्तेर्व्याप्तिमावन्नयाहेतोर्भासतेस्यान्तरस्य विशिष्टमैहेत्वतानामित्यर्थः तथाहि व्याघ्रा-
दयो भीरुताबधाद्योधकत्वेन भयानकस्य विभावाः वीराणामुत्साहवर्धनेन वीरस्य विभावाः अश्रुपूर्वदर्शिनामाश्र

का॰
टी॰
मू॰
39

सूर्योदयहासाऽद्भुतविभावाः अपकृतानां क्रोधविभावनाद्रौद्रविभावाः तथैव विप्रलम्भशृङ्गारे यथा प्रिया
प्राप्त्युपायविमर्शनरूपा चिन्ता व्यभिचारित्वेन पोषिका तथैव वीरे सहायादौ तो चिन्ता करुणे दीनोपकारकादौ
तो चिन्ता भयानके भयहेतूनां निवारणोपायचिन्तेति तथा च प्रतिरसं व्यभिचारिणोऽग्रे दर्शयिष्यते इत्यनैकान्ति
कत्वपरिहाराय मिलितानां निर्देशात्सर्वत्र सर्वेषां यथायथमसम्भवे कारणत्वे सत्यपि नातिसमर्थः ननु विभावानुभावव्यभि
चारिणां क्वापि कस्मिंश्चित्क्वापि द्वयोर्वा सद्भावेऽन्येषामसद्भावे किमेतेषु ना हेतवः किं वा समुदितानूद्गमाशोक्या
ह विपदलिमालिनां मुग्धा भ्रमे मे ह्येष मधुकरकोकिलकाकलीतिर्दिशाश्रीः यथाऽरम्भितवीरुत्करोत्कटकाप्रणानि
परोदयिते प्रसीद सुरते एवं परिमृदितमृणालीम्लानमङ्गं प्रवृत्तिः कथमपि परिवारप्रार्थनाभिः क्रियासु
कलयति च हिमांशोर्निष्कलङ्कस्य लक्ष्मीमभिनवकरिदन्तच्छेदपाण्डुः कपोलः तथा हि दूरादुत्सुकमागते वि
वलितं सम्भाषिणि स्फारितं संश्लिष्यत्यरुणं गृहीतवसने किञ्चाञ्चितभ्रूलतं मानिन्याश्चरणानतिव्यतिकरे
बाष्पाम्बुपूर्णेक्षणं चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि इत्यादौ च यद्यपि विभावानामनुभावानामौत्सु
क्यव्रीडाहर्षकोपासूयाप्रसादानां व्यभिचारिणां केवलानां स्थितिस्तथाप्येतेषामसाधारणत्वमित्यत
मन्दयापेक्षकत्वमस्ति नानैकान्तिकत्वमिति यद्यपि प्रथमोदाहरणे केवलानां विभावानां द्वितीयोदाहरणे
केवलानामनुभावानां तृतीयोदाहरणे केवलानां व्यभिचारिणां वा स्थितिमात्रोद्देशः तथाप्येतेषां विभावा
दीनामेकैकमसाधारणत्वे विभावयन्ति रसान्साधारणत्वे यमेव तन्मसत्तोऽसत्तमन्दयापेक्षकत्वे विभाव्या

कैरस्माविर्भावकत्वमस्माया रूपत्वमेव तत्त्वमनुभावव्यभिचारिणां कार्यसहकारिभ्यां विना न संभवतीति तयोरा
क्षेपः कैलक्ष्या विकासि मिलज्जकेसातानि दिष्टे । यत्रोङ्गयोः सन्नद्धा गणनानि सिद्धौ विभावादीनि मिलितैरसाति स्थि
तैनातैकानिकृतेऽस्य कृत्यर्थं तैर्हेतवो मिलिता वृत्तिशंकितं स्थायि यत्नतास्तीत्यन्वयः । अनैकान्तिकोऽनै
कत्वनियतः सत्त्रियप्रतिनियतिकाः । तथा च विषयदालिमालिते मत्रसातादृशे कैरालम्बनविभावैर्नायिकयाम
द्या दिभिश्चोद्दीपनविभावैश्चन्द्रकैर्मालितीनीतावेष्टादयोऽनुभावभ्रमोहासादयो व्यभिचारिणश्च व्यज्यन्ते । तथा परिस्म
दितन्नरणालोमत्रविविक्तरूपेणश्चेष्टाभिरनुभावैः । सातालाड्कैः कार्योपलब्धाकारणानुमानमिति मायाः
स्वाश्रयत्वेन तल्लम्बनविभावो नायिका निन्ता सति कालश्चोद्दीपनविभावः । स्त्रातातुः तथा कार्येण तत्कारणानि वि
नाक्रियाः स्वप्रहत्तैः कारणमालसेच्छर्मोनिर्वेदादयश्च व्यज्यन्ते । हर्षोत्कर्षकामिस्त्रविवलितमिति क्रीडाकोति
मिति हर्षः । अरुणमिति कोपः । अंचितभ्रूलतमिति स्पृष्ट्या वाष्पाम्बुपूर्णलोचनमिति प्रमादश्चेति व्यभिचारिभिः । केवलैर
पि स्वाश्रयत्वेनालम्बनविभावो नायिका उद्दीपनविभावाश्च तदपराधप्रकाशकः कालादिर्व्यज्यन्ते । तथैवोक्तं तत्सानुभ
वैदीर्यतिः स्मितानीडायास्त्वोपनम्भलोचनादि । हर्षगणे मन्मानोनिनतादि यथा कोपा सोयययोरसंभेदस्तथा
वस्थने तथाहि । अत्र प्रसादइति पदं व्यभिचारिसामान्यतान्मनः प्रसादोद्भवसाधनं सत्कृतो साहर्षवाचकमिति
तथा कोपस्य यो रेकलत्तणे तापकश्चिद्विशेषस्तथा चित्तस्य साक्षात् स्वसंवेदनं हर्षः । अपकारादिसमुत्थकालुष्य
पगमस्तु प्रसाद इति हर्षप्रसादयोर्भेदः । अपि च अतोऽनन्तकक्रीडा हर्षमादवकृत्वा क्रीडा हर्षमासु कैर्क्रीडादीनो विकार

का॰
प्र॰
५
५०

दिति तत्तत्कार्याभिमुखितानां सहृदयानामास्वादयन्तस्सातातिशयो वारितस्योत्सुक्यस्य समन्वायायेति । एवं रसं सामान्यतो निरू
प्य विशेषमवतारणिकामुखेनाह तद्विशेषानाह शृङ्गारहास्यकरुणवीररौद्रभयानकाः बीभत्साद्भुतसंज्ञौ चेत्य
ष्टौ नाट्ये रसाः स्मृताः तस्य सामान्यतो निरूपितस्य रसस्य विशेषा भेदाः अत्र स्थानकृतिर्नाट्यमिमेवं लक्षणेभिन्न
यात्मके रूपे नाट्येष्टावेव रसाः शान्तस्याभिनयासम्भवात् काव्ये तु श्रव्ये शान्तोपि नवमो रसः अत एव तन्नि पादनार्थं
नाट्यपदं तथा चोक्तं नाट्यालंकारे रत्युत्साहजुगुप्साक्रोधो हासः स्मयो भयं शोकः शममपि केचित्प्राहुः पुष्टिर्नाट्येषु
नैतस्य प्रमोदितमस्तमापाधविलयरूपस्याभिनयायोगाद्यतिभावः तदुक्तं न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ
न च काचिदिच्छा रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु शमप्रधानः तत्र शृङ्गारस्य द्वौ भेदौ संभोगो विप्रलम्भ
श्च तत्राद्यः परस्परावलोकनपानपरिचुम्बनाद्यनन्तभेदत्वादपरिच्छेद्य इत्येक एव गण्यते तत्र रसाष्टकमध्याच्छृङ्गा
रः संभोगविप्रलम्भाख्यया द्विधा तत्राद्विविधोपि शृङ्गारोप्याद्यः संभोगाख्यो व्यापकविषयत्वात् परिच्छेद्यत्वात् तथा चा-
लक्षणं ग्रन्थान्तरेषु रम्यदेशकलाकालवेशभोगादिसेवनैः प्रमोदात्मा रतिः सैव यूनो रक्तयोः प्रहृष्यमाणा
शृङ्गारो मधुराङ्गविचेष्टितैः आलम्बनं नायकाः स्युर्धीरोदात्ताद्याश्च नायिकाः चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतम्
भ्रूविक्षेपकटाक्षादिरनुभावाः प्रकीर्तिताः त्यक्त्वौग्र्यमरणालस्यजुगुप्सा व्यभिचारिणः स्थायीभावो रतिः श्या
मवर्णोयं विष्णुदैवत इति शृङ्गारस्य लक्षणं ग्रन्थान्तरेऽपि लक्षणं दर्शनस्पर्शनादीनि निषेवेते विलासिनौ यत्रानुरक्तावन्यो
न्यं संभोगोयमुदाहृत इति एतदेवोदाहरति यथा शून्यं वासगृहं विलोक्य शयनादुत्थाय किंचिच्छनैर्निद्राव्याजमु-

विमर्शाख्यप्रसन्धेरुपाज्ञायते इति शान्तरसव्यभिचारीति तर्क उदितः भयेपि हर्षेणैतत्समत्र कालावमतमो-
न्तकामिनीमीनस्तकेनन्तं शृङ्गाररसव्यभिचारिणोपमर्द्यते नक्षविशेषाणामंशमायमेककान्तिमिति रीतिमार्गानुसारा
देरर्थनिर्धारणं मतिरिति निरूपणं नासंचारिणामतिभावेनोपमर्द्यते सा च ग्रहो कोपेपि कान्तमनुखामिति शृङ्गा
रसंचारिणाममर्षेणोपमर्द्यते नटवि किंवदन्तिपकल्पना: क्लान्तोयमिति शान्तसंचारिणा शङ्कयोपमर्द्यते
मापिस्वप्नेपि मा इते भेपि सामर्थ्याखेदनयातुत्सभवे दैन्यस्तुखाने इति दैन्येन शृङ्गारसंचारिणोपमर्द्यते नदविवेनः
म्लानस्यानुपदेशान्ति नानाभीष्टागमाद्येस्त्वमपूर्णमस्तु हता धृतिरिति शान्तसंचारिणा धृत्योपमर्द्यते सापि कः एव
तेषु वाथ स्याथ दास्यन्ती तिथ्यानं चिन्ता नाप्रेति इति शृङ्गारसंचारिणा चिन्तयोपमर्द्यते नदेवशान्तसंचारिणो वितर्केम
निशङ्काधृतयः शृङ्गारसंचारिभिरेतस्य कामस्मरणादेनाविनाभिरापमर्दिताः इति पूर्वपूर्वोपमर्दकत्वेनोत्तरोत्तरेषामनुदया
भावानन्सावलतेति यथा शान्तस्यादयो भावस्थाव स्थास्नस्यास्थितिरपि वावस्थान्तरमित्याह भावस्यास्थितिरकाले
दारुताव ज्ञानेकोपपरोत्स्मृतीत्सादिना प्रशान्तादिभिरनपायमानत्ता भावस्य भावस्थितिः सा च ज्ञाने कोपपरोत्स
शैलोदाहृता वोत्सर्थः तथा लब्धविभावादिभिर्व्यक्ति तस्या स्थायाख्यस्य भावस्य प्रशमादेर्विरभायितत्वास्थितिरेवा-
ति नन्व विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति सम्भवालम्बनेनरसैगतेरुप्राप्तस्य संचारिणो भावस्य
भवत्वकथं वन प्रधानं यानकरसस्वोत्कटतेनमभिवादस्यनप्रशमादीनां तुरसात्वपकारकत्वयाकथं प्राधान्यमिति सा
ह मत्वोरसोपितेक्षि: तेप्राप्नुवंतिकदाचन ते भावप्रशान्त्यादयः अंगितेराज्ञानुगतविवाहप्रवृत्तभृत्यवत प्राप्त

का॰ प्र॰ धा॰ ४१

ख्वतएव भावप्रमादैः प्रायशो पर्यवसानेऽत्र रसस्यैव पर्यवस्यति यथाहस्तस्सुरण्यपदानि वा दिशादिरूपवरि
तेनतएव प्रेतकाणं विस्मयकारिणि राजानुगते विवादप्रवृत्ते राजनस्तेहेपर्यन्तत्तो राज्ञेव धर्मयास्य पर्यवसा
ति राजायमेवानुग्रहकोयन्तस्मिन्सम्भवविवादयन्तीत्यर्थः एवं विवक्षितान्यपरवाच्यस्यालक्ष्यक्रमव्यङ्ग्यतो
प्रदर्श्य संलक्ष्यक्रमव्यङ्ग्यतां दर्शयन्नाह अनुस्वानाभसंलक्ष्यक्रमव्यङ्ग्यस्थितिस्तु यः शब्दार्थोभयशक्त्युत्थस्त्रिधा स क
थितो ध्वनिः शब्दशक्तिमूलानुरणनरूपव्यङ्ग्यस्येति त्रिधा घटादीनामभिघातजातः झङ्कृत्या डम्बतोनः शब्दोनुस्वानः
तत्रानुस्वाने यथाक्रमः संलक्ष्यते अभिघातजाकघण्टादेर्यथा शब्द उत्थितस्तथैव संलक्ष्यः क्रमो व्यङ्ग्यस्य
जकनामकोयस्मिन्ना शब्दशक्त्युत्थव्यङ्ग्यस्य स्थितिर्यस्मिन्नध्वनिस्त्रिधा कथितस्तु इति सम्बन्धः यथा घण्टानानु
स्वानयोः क्रमो लक्ष्यते यद्वदत्तल्लक्ष्यतिरूपव्यञ्जकनामिन्यर्थः एतदेव प्रपञ्चयति तत्र अलंकारोथ वस्तु
वा शब्दाद्यत्रावभासते प्रधानत्वेन स ज्ञेयः शब्दशक्त्युद्भवो द्विधा वस्तुवेमत्नलंकारवस्तुमात्रम् प्रधानत्वेनेति
अप्राधान्येन गुणीभूतव्यङ्ग्यत्वेनेत्यर्थः एतदेवोदाहरति आद्यो यथा उल्लास्य कालकरवालमहाम्बुवाहं देवेन ये
न जरठोर्जितगर्जितेन निर्वापितः सकल एव रणे रिपूणां धाराजलैस्त्रिजगति ज्वलितः प्रतापः आद्यः शब्द
शक्त्युत्थोलंकारध्वनिः अत्र वाच्यस्यार्थस्य व्याहत्याभिधायकत्वेनासमसादीदिति प्राकरणिकाप्राकरणिक
योरुपमानोपमेयभावः कल्पनीय इत्युपमालंकारो व्यङ्ग्यः कालोर्थीद्धे विसर्दनो वासोकरः वाल ध्वनिः
तस्योपमानः पाण्डितस्पैतेऽपदार्थे दीर्घकालीनोधिपतिवाहः प्रवाहसम्भतास्योच्चैः प्रदर्शयेदेवदेवनरा

मुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखं विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं लज्जानम्रमुखी प्रियेण हस-
ता बाला चिरं चुम्बिता अत्र नायिकालम्बने शून्यं वासगृहमिति देशविशेष उद्दीपने चुम्बनमनुभावः लज्जाहासौ
व्यभिचारिणौ एभिरभिव्यक्तो भावः सहृदयेषु विलक्षणात्मस्सम्भोगशृङ्गारतां भजते तथा नेत्रगन्धादिविनेवके-
चुलिकया यत्नेन मनोहारिणी लक्ष्मीमिमसि भिपर्यायेति निश्चयेन मेनह्रीढिका सेस्मरोशाशयापाने निविष्टसास्मितसखी नेत्रोत्सवा
नित्येनेति यैत्तः शनकैरलोकवचनोपमा समालीजनः तथा सम्भोगशृङ्गारप्रकारेणैव अत्र नायकआलम्बने वी-
टिकायाः वस्त्रग्रन्थेः स्पर्शोऽनुभावः स्मितहर्षौ व्यभिचारिणौ अत्र व्यक्तोऽपि रसः प्रदेशः सखीनिर्याणमाजितोद्दीपने भा-
वे अत्र नायिकालम्बनमत्र नायकस्य सेवाविशेषः अपरस्त्वभिलाषविरहेर्ष्याप्रवासशापहेतुकः इति पञ्चविधः अपा-
ये विप्रलम्भः तल्लक्षणं चाप्यभावोपादानसंमिलितो मप्रकर्षमीयिगच्छति नायिका नायको वाभीष्टं विप्रलम्भलक्ष्यत इति
तथा चाभिलाषपदेन पूर्वानुरागोक्तिः तथा हि श्रवणादर्शनाद्वापि मिथः संरूढरागयोः दशाविशेषो योऽप्राप्तौ पूर्वराग-
स उच्यते अभिलाषश्चिन्तास्मृतिगुणकथनोद्वेगसंप्रलापश्च उन्मादोऽथ व्याधिर्जडता मृतिरिति कामदशा दश विरह-
पदेनायोगः तयोरेवानुरागोऽपि नवयोरेकचित्तयोः पारतन्त्र्येण दैवाद्वा विप्रकर्षादसंगमः अत्र प्रवासं व्रजती त्वद-
हरणापषा विरहोत्कण्ठितेत्यत्र तत्प्रोषितपतिकेति भावः तथा चान्तयोर्लक्षणं आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत्प्रि-
यः तदनागमदुःखार्ता विरहोत्कण्ठितेति सा नानाकार्यवशाद्यस्या दूरदेशं गतः प्रियः सागतो भवदुःखार्ता भा-
वेत्प्रोषितभर्तृकेति ईर्ष्यापदेन मानः मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भवः द्वयोः प्रणयमानः स्यात्प्रमोदे सुम-

हृत्स्वपि प्रेम्णः कुटिलगामितात्कोपोयः कारणं विना ॥ पत्युस्त्वप्रियासंगे दृष्टेवानुमितेश्रुते ॥ ईर्ष्यामानो भवेत्स्त्री-
णां तत्र त्वनुमितिस्त्रिधा ॥ उत्स्वप्नायितभोगांकगोत्रस्खलनसंभवेति ॥ प्रवासो भिन्नदेशत्वं एकदेशस्थयोरापस्त्व-
मादिकोपात्त्रियंत्रणेशापः ॥ नियंत्रणं दर्शनस्पर्शाद्यभावः ॥ एतद्देवदर्शयति ॥ क्रमेणोदाः ॥ प्रेमार्द्राः प्रणयस्पृशः परिचा-
यादुद्गाढरागोदयास्तास्तांमुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि ॥ यास्वंतःकरणस्य बाह्यकरणव्यापाररोधी क्षणा-
दाशंसापरिकल्पितास्वपि भवत्यानन्दसांद्रो लयः ॥ अत्र मालती साक्षाद्दर्शनप्ररूढरागस्य माधवस्याभिलाषेण प्रकर्षं
नीतः पूर्वरागाख्यो विप्रलम्भः ॥ तथौत्सुक्यहर्षणविभावेन तच्चेष्टाभिरनुभावैः ॥ आशंसापरिकल्पितास्विति गम्यैः
मत्याद्यैर्व्यभिचारिभिः ॥ प्रकर्षं नीता माधवस्य रतिरभीष्टस्य प्रियालिंगनादेरनधिगमात्सहृदयेषु विनष्टस्य पूर्वरा-
गाख्यविप्रलम्भतयापरिणमति ॥ एवमभिलाषमुदाहृत्य विरहमुदाहरति ॥ अमन्त्रव्रजन्तीतिकावल्लकथ्यानाप्यप्र-
ताद्वस्सहृद्योमानेन कृतिनागतश्चहहद्दहाकोयंविधेः प्रक्रमः ॥ इत्यत्रेनरकल्पताकवलितस्वांतानिशांतान्तरेबाला-
हृत्वाविवर्त्तनव्यति ॥ कारान्नामोतितिनिद्रातिवृत्तिः एषाविरहोत्कण्ठिता ॥ अत्रतवयोः कयोश्चिन्नायकयोरनुरागिणोरन्तःप्रवा-
सितोपि गुरुपारतंत्र्यादिना विप्रकर्षादयोगाख्यो विप्रलम्भः ॥ अतएवैषाविरहोत्कंठितेत्युक्ते ॥ तथात्रनायकेनालम्ब-
नेनायोगकालेनवोद्दीपनेनामन्त्रव्रजन्तीत्यादिनाममसानाप्यप्रस्ताद्वस्सहृदित्यादिना वितर्केणागतश्चहहद्दहेतिचिन्त-
यावेतिव्यभिचारिभिः ॥ इत्यत्रेतरेत्यादिनायिकाचेष्टाभिरनुभावैः ॥ प्रकर्षं नीता नायिकाया रतिरभीष्टतोप्रियसंगमादेर-
नामनधिगमात्स्वनमः ॥ सहृदयेषुद्रावणाद्योगाख्यविप्रलम्भरसतां भजते ॥ ईर्ष्याविप्रलम्भमुदाहरति ॥ सापत्न्यः प्रथ-

मध्यायसमयेसख्योपदेशंविनानोज्ज्ञातानिसविभ्रमांगवलनावक्रोक्तिसंसूचनम् सच्छेरक्तकपोलमूलमालि
नेःपर्यस्तंतेनात्रासर्वलोकेवल्लभेवरोदितिलुठतीलालकेःस्वैभिः सख्युर्भावकमेवासख्येतेनोपदेशः सख्योपदेश ;
अत्रप्रश्रम्भस्यासंगदर्शनादौर्मानः एवंचात्रनायकेनालम्बनेनेर्ष्यासमयेनचोद्दीपितेनेर्ष्ययाव्यभिचारिणास्वभि
स्तुभावैः प्रकर्षितोनारतिरभीष्टानांप्रियालिंगनादीनामनधिगमात्सहृदयेषुविलसत्सामानाख्यविप्रलम्भरसतां
भजते प्रवासहेतुकमुदाहरति प्रस्थातेवल्लये:कान्तेप्रियसखैवरसैःरजस्वैगांतैःप्रमानतलणमासितेव्यवसितेवि
त्तेनगतेपुरः यातेतिनिश्चितचेतसिप्रियतमेसर्वैसमंप्रस्थिता गंतव्येसतिजीवितप्रियसहृत्सार्थःकिमत्यज्यते अत्र
प्रवासोभावी नायकेनालम्बनेनवसन्तसमयेनचोद्दीपितेनप्रस्थातेवल्लये: कृतमितिगम्ययाकृशतया[illegible]नस्वे
गतमितिस्वभिरनुभावैर्हसानेतिचलितयाव्यभिचारित्वमितिवितर्केणागतमिसादितिदैन्येनजीवितेसाद्गुण्यस्थानामामंत्रणं
त्वमितितेनोन्मादेनचपुष्टिंनीतानायिकायारतिः भाविप्रियप्रवासहेतुकयाभीष्टानांप्रियादर्शनामनधिगमणोकयाप्रवा
साख्यविप्रलम्भरसतयाङ्गतिकरणासह्यहृदयहृदयेषुस्वदनेशापहेतुकमुदाहरति त्वामालिख्यप्रणयकुपितांधा
तुरागैःशिलायाःमात्मानंतेचरणपतितंयावदिच्छामिकर्तुं अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यतेमेक्रूरस्तस्मिन्न
पिनसहतेसंगमंनौकृतान्तः अत्रकान्तालम्बनेनचित्रलिखितदर्शनेनोद्दीपितेनकामीतिमतिर्व्यभिचारिणाअस्राद्यनुभावः
पोषितोभिव्यक्तानायकस्यरतिरिष्टप्रियापादस्पर्शनावाप्तेः विप्रलम्भतांभजते अपिचात्रचित्रदर्शनसापेक्षता।
याःकान्ताभावेनोपपत्तिनायाअभिन्नदेशत्वेजातेपिकान्तेनेनाय मासिद्धान्तदेवाकुशलकर्मस्वित्स्वेदनात्कृतोनस्या

का॰ टी॰ ५२ 53

कुशलकर्मापर्यायस्य शापस्यापहृतत्वमेवेष्टस्य तद्वरणस्येर्ष्याप्राप्तौ हेतुरिति शापहेतुकोयं विप्रलम्भः तथावोक्तेः
विरतिरिकायापकषायतस्य योपि कोपादिप्रतिबंधे विप्रलम्भः तथा वोक्तेः विरतिरिकायापकषायतस्य योऽपि कोपादि
प्रतिबंधे विप्रलम्भः विदेशस्थयोरपि हृतीसंप्रयोगणे दोसम्भोगः तस्माद्यदत्र दर्शनेकारणमवष्टंभेगामातप्रवासका
रणमात्मकश्चतयोस्यादित्यत्रप्रवासोभिन्नदेशतेशापान्कार्याच्चसंभ्रमादिति विरहशापहेतुकयोः प्रवासएवान्तर्भावः।
क्रमत्वेच्छिरस्यमेकदेशावस्थानात् नोदिस्त्यप्रतिरसे विभावानुभावव्यभिचारिणामुदाहरणप्रपंचः पृथक्पृथग्ज्ञाति
प्रियाग्रंथादावबोध्यः हास्यादीनां क्रमेणोदाः आङ्केविपाणिमपुविममसूर्यिवेषणामेत्रात्मसोप्रतिहितेषष्ठ।
तैःपवित्रे नाथस्त्वंप्रहितन्मृत्कमदान्महांहाहाहतेनोद्गमितिहितोदितिविस्मयाम्भो अत्रचवेषणायामत्वागाणामालम।
तैविस्मयाभिधानैयववैपुण्यायहासनिक्षासितंरुदंतमवलोक्य कमविहगहसत्वेषतो विकासहृषोहासः स्थायि।
भावः तदीयवेदनपश्चात्तापाद्यैरुद्दीपितैरुद्दीप्यमानः तदीयैरेववागारम्भवाक्यैःशोकावहित्थागुह्यादिभिः पु
ष्टिंनीतोमाधुर्येणहास्यरसतांभजते तथावहास्यलक्षणे विकृताकारवाग्वेषचेष्टादेः कुहकाद्भवेत् हासोहा।
स्यायिभावोद्विधात्मपरगोचरः विकृताकारवाग्वेषंयमालोक्यहसेज्जनः तदत्रालम्बनेप्राहुस्तच्चेष्टाद्दीपनं।
तथा अनुभावोनासिकौष्ठकपोलस्पन्दनादयः निद्रालस्यश्रमग्लानिमूर्च्छाद्याव्यभिचारिणः आदिशब्देनावहि
त्थाचकरुणमुदाहरति हामातस्त्वरितासिकुत्रकिमिदंहादेवताः क्वाशिषोधिक्प्राणान्पतितोशनिर्हुतवहस्ते
ङ्गे॰ धृष्टदग्धेदृशो इत्येवघर्घरमध्यरुद्धकरुणाःपौरांगनानांगिरश्चित्रस्थानपिरोदयंतिशतधाकुर्वंतिभित्तीरपि अत्रा

५२

कोविद्धान्नमहिषीं मृतामालम्ब्यो मनुजस्तस्मारिजनस्य शोकः स्थायी तद्रूपनक्रूरीरवह्निसंयोगाद्यैरुद्दीपितारोद-
नैतानुभावेनन्तद्योग्यैर्दैन्यग्लानिमूर्च्छाद्यैर्व्यभिचारिभिः पुष्टिं नीतः सहृदयेषु करुणाख्यरसतया स्वदते
तथा वास्य लक्षणं इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत् शोकोत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतं
कथितगुणानुवाद्या भवेदुद्दीपना इह अनुभावा दैवनिन्दाविलापः स्तब्धगात्रता श्वासक्रोशाननपातैश्चानोरस्ताडनानि
वस्तुवैकृत्यविवर्णतारोदनाद्याः प्रकीर्तिताः अत्रापस्मारनिकाजागर्तिनिर्वेदग्लानिदीनताः चिन्ताविषाददैन्यस्तम्भकम्प
चापलोन्मादमृत्यवः आलस्यापस्मृतिव्याधिमूर्च्छाद्या व्यभिचारिणः रौद्रं दर्शयति कृतमनुमतं दृष्टं वा यैरि-
दं गुरुपातकं मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः नरकरिपुणा सार्धं तेषां सभीमकिरीटिनामयमहमसृङ्मेदो-
-मांसैः करोमि दिशां बलिं अत्र द्रोणवार्थवधादपकारिणोर्जुनादीनालम्ब्याश्वत्थाम्नः क्रोधः स्थायी वागारम्भाः
मैः शस्त्रोद्यमनाद्यैरुद्दीपितैः प्रतिज्ञयाचानुभावेनायमहमित्यनेनापवादाभ्यन्तरगर्वेण व्यभिचारिणा च पुष्टिं नीतः स-
हृदयेष्वतिशयेन विज्ञस्वलनाद्रौद्ररसो भवति अस्य लक्षणं रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः आ-
लम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतं सोल्लुंठहासंवक्रोक्तिकलावात्मादादयः आदिशब्देन मुष्टिप्रहारपातनविकृ-
तच्छेदावदारणसंग्रामादयः हस्तनिष्पेषणदन्तच्छदनेनेत्ररक्तता देहोष्ठस्फुरितभ्रुकुटीभुजास्फालनताडनाः स-
सीकृताननताम्रतानिःश्वासो भुग्नदृष्टिता भर्त्सनेमूर्धविधुतिर्हेगनपादतलक्रियाः भ्रूभेदाधरकम्पाद्या अनुभावास्त-
थोदिताः आवेगो जडता गर्वो निर्वेदो मोहचापले असूयोग्रतयामर्षश्रमाद्या व्यभिचारिणः आदिशब्देन स्तम्भा

का· टी· ५५ दयः सात्विकाः वीरमुदाहरति क्षुद्राः संत्रासमेते विजहत हरयो भिन्नशक्रेभकुम्भा युष्मद्देहेषु लज्जां दधति प
रममी सायका निष्पतन्तः सौमित्रे तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः किञ्चिद्भ्रूभङ्गलीलानियमितजल
धिं राममन्वेषयामि अत्र राममालम्ब्य मन्त्र इन्द्रजितस्तस्मादुत्साहः स्थायिभावः लक्ष्मणोपेक्षणानराममन्वेषयाचानुभाव
नावज्ञोदयनीतिगर्भेण गर्वेण व्यभिचारिणावबोधितः सहृदये प्रविश्य साविस्तारमुपज्वलनं जनयन्ती न वीररसतां
भजते तथाचैतल्लक्षणं कार्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते उत्तमः प्रकृतिर्वीरः उत्साहस्थायिभाववान् आ
लम्बनविभावस्तु विजेतव्यस्तथा मतः विजेतव्यस्य चेष्टाद्यास्तस्योद्दीपनकारणः अनुभावास्तु तत्र स्युः सहायान्वेषणाद
यः सञ्चारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात् भयानकमुदाहरति
ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायम् शष्पैरर्धावली
ढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति अत्र स्यन्दनमालम्ब्य
सञ्चारमृगगाम्यभयं स्थायिभावः श्रमेण व्यभिचारिणा पोषितः पश्चापादग्रेणादिवाच्येन पलायनेन प्रकटीकृतो रसिक
मनः स भयानकतया स्वदते तथाच भयानकलक्षणं प्रोक्तो भयस्थायिभावो विदितैर्भयानकः व्याघ्रदन्तः शि
वोलूकभल्लकारण्यदर्शने अस्मायोगेनिवासञ्चवत्यतोवयवेयते · आलम्बनविभावास्तु कृतान्ताद्या विलोकि
ताः व्याघ्रसिंहविकृतस्वरूपाणां सर्वेषामुग्रहणे चेष्टाघोरतरास्तत्र भवेदुद्दीपनं पुनः अनुभावोऽत्र वैवर्ण्य
गद्गदस्वरभाषणं पुलकस्वेदरोमाञ्चकम्पादिक्प्रेक्षणादयः जुगुप्सावेगसम्मोहसंत्रासग्लानिदीनताः शं

५५

काव्यस्मारसंभ्रान्तिमन्यास्याङ्गाभिवारिणः ॥ बीभत्समुदाहरति ॥ उत्कृत्योत्कृत्य कृत्तिं प्रथममथपृथूत्सेध
भूयांसि मांसान्यंसस्फिक्पृष्ठपिण्ड्याद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा आर्त्तः पर्यस्तनेत्रः प्रकटितदश-
नः प्रेतरङ्कः करङ्कादङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति पावकव्यमदेनप्रेतेपश्यतः श्मशा-
नेविभावः मांसमज्जान्त्रगलपदास्थ्यादिविभावः मांसभक्षणाद्यैरुद्दीपितः उद्वेगारम्भानुमितेनासात्त्विकोवा
दिभिरनुभावैरुद्वेगादिभिर्व्यभिचारिभिः पुष्टिं नीतः सहृदयानामभिनिशायेन विरक्तत्वलक्षणं बीभत्सरसतयाव-
स्थां करोति बीभत्सादेश्चमत्कारित्वमलौकिकत्वेन निरूपितं प्राक् काव्यार्थश्चमत्कारः सर्वरसाश्रय इति ता-
यावाह्लादकत्वे सामर्थ्यमिन्नावच्छेदमेलामेवलपति कोऽसावास्वादः काव्यार्थसंभेदादात्मानन्दसमुद्भवः विकास-
विस्तरक्षोभविक्षेपैः स चतुर्विधः हास्याद्भुतभयोत्कर्षकरुणानां त एव हि अतस्तज्जन्यता तेषामत एवावधारणं स्वा-
दः काव्यार्थेन विभावादि समुल्लासनात्मकवाक्येन सह संभेदः संयोगो विमर्द इति रूपस्तस्मादु-
त्पन्नात्मानन्दसमुद्भवस्तत्काले विगलितवेद्यान्तरतया मुक्तिसदृशेन सहृदयस्य स्वादो रसस्य वर्णीयते स मनसः
शृङ्गारविमर्शाद्विकासः प्रमोदप्राप्तस्य भवति वीरविमर्शाद्विस्तरः समयोगप्राप्तस्य भवति बीभत्सविमर्शात्क्षोभस्त-
त्प्राप्तस्य रौद्रविमर्शाद्विक्षेपस्तु आकुलताप्राप्तस्य भवति एवमनेन क्रमेण हास्ये मनसो विकासः अद्भुते विस्तारः
भयानके क्षोभः करुणे विक्षेपः अत एव हेतोस्तज्जन्यता शृङ्गारादिजन्यता तेषां हास्यादीनां अत एव मनसो

का॰
टी॰
५५
45

हन्निवत्तरुथयस्यहैदाथयावेवेसवथासंबन्धवद्भेदः तथाचोक्तं शृङ्गाराद्धि भवेद्धास्यो रौद्राच्च करुणो रसः वीराच्चै-
वाद्भुतोत्पत्तिर्बीभत्साच्च भयानक इति अथ यद्यपि करुणादिकाव्यश्रवणादस्य पानादिना सहृदयानां दुःखावि-
र्भावो दृश्यते तथापि पर्यन्ते चमत्काराद्युल्लासवानिशायोऽस्य प्रबन्धस्य यथा रीणेन वेतनाद्यैः एतत्समभा-
वे त्वामपि वेदनायोसरते सा वानिशयपदेति तथा च बीभत्सलक्षणं जुगुप्सा स्थायिभावस्तु बीभत्सः कथ्यते
रसः दुर्गन्धमांसरुधिरादिकमालम्बनं मतं जुगुप्सनीयस्य गुणा भवेदुद्दीपनं पुनः निष्ठीवनास्यवलननेत्रसंको-
चनादयः अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः मोहोपस्मार आवेगो व्याधिश्च मरणादयः ॥ अथाद्भुतमुदाह-
रति ॥ चित्रं महानेष बतावतारः कस्य कान्तिरेषाभिनवैव भङ्गिः लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एष
सर्गः अत्र महापुरुषदर्शनादुत्पन्नो विस्मयः स्थायी महापुरुषो धर्मालम्बनेन तद्गुणातिशयेनोद्दीपनेन वक्त्रवाग-
रम्भानिमिनमेषत्तिर्यगतिर्हर्षादिभिः संचारिभिः परिपुष्टः सहृदयानां चेतसो विस्तारात्मकदीप्तिजननादद्भुततया स्वाद्यतो
भजते तथा चास्य लक्षणं अतिलोकैः पदार्थैः स्याद्विस्मयात्मा रसोऽद्भुतः विस्मयः स्थायिभावोऽस्य वस्तु लोका-
तिगं पुनः निर्निमेषतया वीक्षा रोमाञ्चसाधुवादने प्रसेकोऽत्र शरीरस्य हर्षश्चैलोत्क्षेपश्च संभ्रमः अनुभावास्तथा स्तम्भ
स्वेदरोमाञ्चगद्गदाः आवेगहर्षजाड्याद्या अत्र स्युर्व्यभिचारिणः तथा चाद्भुतोदाहरणं तागातते ग्लानिर्नोपिक
पीयमानरुधिरस्यापास्निर्यैर्यो दधेर्मासोत्कर्षणाज्जो दन्तानिवद्धनः प्रीत्या प्रमत्तेमत्त्वं राजेयत्रविरक्तसमेषुत्सकस्तत्रक्र

-टोत्स्यते हर्षादिर्गुणकारिणीवनिपतनस्य स्थाय्यपकारिण्यपि सर्वस्यैव काव्यस्य परमार्थतश्चमत्कारैक्यादभेदे सा-
मान्यविस्थायिभेदाङ्कुरादिभेदेन भेद इति स्थायिनः प्राह ॥ एषां स्थायिनश्चाह ॥ रतिर्हासश्च शोकश्च क्रोधोत्साहौ
भयं तथा जुगुप्साविस्मयश्चेति स्थायिभावाः प्रकीर्तिताः सशेत्तिहतिरसस्वर्वर्णापर्यन्तं स्थायी तथा च भरतः
रसैवर्वर्णापर्यन्तं यस्य स्याद्व्यभिचारिणः बाधिः सप्रवभावः स्यात्स्थायी संचारिणः परे तृष्णस्मनात्तेनेयेपि अवि-
रुद्धाविरुद्धा वा ये भावास्त्वशक्तास्तिरोधातुम् स्थिरो यावद्रसास्वादं स स्थायीभाव उच्यते अविरुद्धैरपि स्पष्टभावाः संचारि-
णो विलीनाः मध्ये मध्ये विलीयन्ते नार्हन्ति स्थायिनो ततः अशेषरसादयस्त्वेतेतैस्तैर्नीतास्ततः पुष्टतां समेषु स्था-
यितां यातोऽन्तर्विमेभ्योवितन्विते अष्टानामेव भावानां संस्काराः स्थायिनो ततः समेषु स्थायितां याता रुचिमेभ्योवि-
तन्वते अष्टानामेव भावानां संस्काराः स्थायिनो मताः तन्निरूहणसंस्काराः तत्तत्स्थायिनो मता इति तथा वैषां वि-
शेषलक्षणानि मनोऽनुकूलेष्वर्थेषु सुखसंवेदनं रतिः वैकृतविकारः हासः स्यात् वेषवेशादादिवैकृतात् सद्यशिका
मनामेष कपोलस्पन्दनादिकृत शोकस्त्विष्टवियोगाद्यैश्चित्तक्लेशः करैः स्मृतः विलापः पातनिःश्वासस्तुब्धशोष
भ्रमादिकृत प्रातिकूल्यादिभिश्चित्तज्वलनं क्रोध उच्यते पारुष्यभ्रुकुटीनेत्रलौहित्यादिविकारकृत स्थेयधीमा
धीभिः श्लाघ्याफलेषु उद्धादिकर्मणि सन्तरामानिमाशाकिरुत्साह इतिकीर्त्यते कालाधवैकल्यधैर्यतत्रत्यागोद्यमा
दयः भयं चित्तस्य वैक्लव्यं मन्तचोरत्वलादिभिः भ्रान्तमगोपनकृत् कोशविद्रवभ्रमणादिकृत जुगुप्सा स्यादृष्ट-
यानुभावाश्चित्तमीलने तच्च निष्ठीवनेवकृत् तत्क्षन्नासनादयः लोकातिरार्थैवलोकितैर्विस्मयश्चित्तविस्तृतिः आ-

वा॰ रस्मैनेत्रविस्तारस्माधूर्जिपुलकादयः अथस्थायिभावान्तकाव्यभावैःसहगम्यमानकभावमात्रभावान्वपेक्ष्य व्यभिचा
प्र॰ रिणिएवनिर्दिशति व्यभिचारिणिआह निर्वेदग्लानिशंकाख्यास्तथासूयामदश्रमाः आलस्यंचैवदैन्यंचचि॰
५६ न्ताःमोहःस्मृतिर्धृतिः व्रीडाचापलताहर्षआवेगोजडतातथा गर्वोविषादऔत्सुक्यनिद्रापस्मारएवच सुप्तंवि
बोधोमर्षश्चाप्यवहित्थमथोग्रता मतिर्व्याधिस्तथोन्मादस्तथामरणमेवच त्रासश्चैववितर्कश्चविज्ञेयाव्यभिचा॰
56 रिणः तथाचग्रंथान्तरादेतल्लक्षणं मोहार्तिविप्रयोगेर्ष्यासद्विवेकादिकल्पिते स्वावमाननमेवात्र निर्वेदइति
कथ्यते अत्रचिन्ताश्रुवैवर्ण्यदैन्यनिःश्वसितादयः ग्लानिःखेदात्मकंदेहेबलोपचितिकृत्स्मृता तथाश्रमाध्वरत्यादेर्ग्ल
निर्निष्प्राणतामता कम्पांगजाड्यवैवर्ण्यकार्श्यदृग्भ्रमणादिकृत् स्वीयचौर्यापराधाद्यैःपरक्रौर्यादितस्तथा स्वानि
ष्टचेतलक्षणंयत्रसाशंकेत्यभिधीयते अत्रास्यशोषस्वेदवैवर्ण्यदिक्प्रेक्षालीनतादयः द्वेषःपरोदयेसूयास्यात्सौभाग्य
गुणादिभिः अत्रेर्ष्यानादरावज्ञाहेलावेषोगुणेष्वपि अपहासनिन्दारोषोद्वेगाभ्रूभंगरुक्तादयः विवेकह्रासउल्लासोम
दस्सविविधोमतः मधुपानभवोनेत्रविक्रियासम्भवोपिच गात्रस्फूर्वाणीस्खलनदृग्घूर्णाक्षिमादिकृत् अध्व
रत्याद्युत्थःखेदःश्रमइतीर्यते निद्रास्वेदांगसंमर्दजृम्भाश्वासादिभागसौ सामर्थ्यस्यापिसद्भावेक्रियानुत्सुकता॰
हिया तृप्तिश्रमादिसंभूतमालस्यमुदीर्यते अत्रांगभंगोजृम्भाचक्रियाद्वेषोक्षिमर्दनं शय्यासनैकप्रियता॰
तंद्रानिद्रादयोपिच दुःखत्रासापराधाद्यैरनौर्जित्यंतुदीनता वाङ्मन्दत्वमालिन्यचित्तगात्रजडिमादिकृत् ध्याने
चिन्ताभवेदिष्टनाशाप्राप्त्यनिर्मिते श्वासाधोमुखभूलेखवैवर्ण्यनिद्रतादिकृत् विलापोन्मादपक्षशरतावाष्पदेसाद

योपिव मोहोऽयन्मूर्छनादर्शनादिश्लेषाद्भयतस्तथा । विषादादेस्तुतत्रस्यादेहस्यपतनं भुवि अश्मेत्स्यियवंभ्रमा
ऐतघ्यानिश्चूष्टतादयः यास्यात्सर्वानुभूतार्थप्रतीतिः सदृशेक्षया दृढाभ्यासादिना वापि स्मृतिः सा परिकीर्ति
ता भवेदत्राशीःकम्पो भ्रूविक्षेपादयोपिव धृतिः स्यात्सुखेनात्तावष्टम्भो भावोत्रमामिभिः सौहित्यवदनोल्लाससहा
हासप्रतिभादिकृत नवीनसंगमाकार्यस्तत्रावज्ञादिनाकृतः अधृष्टताभवेद्व्रीडा तत्र मौनं विचिन्तनम् अव
गुण्ठनभूलेखनस्तथाधोमुखतादयः रागद्वेषादिभिश्चित्तलाघवं चापलं मतम् अत्राविचारपारुष्यस्वाच्छ
न्द्याचरणादयः अभीष्टलाभादिनानावेगः प्रसन्नता हर्षः स्यादत्ररोमाञ्चः स्वेदोऽश्रुमुखफुल्लता आवेगोन्म
दश्वानिष्टयोग्यमहादयोपिव वित्तस्य संभ्रमो यः स्यादावेगो यं समाहृतः प्रियाप्रियमहत्वैर्यातानवह्निगजोरिजः प्रियोत्थेपुल
कः सान्त्वनाप्यात्मागुग्रन्थमादयः अप्रियोत्थेत्तरयापातविक्रोशभ्रमणादयः --- स्वागतिकम्पादिभीत्तनाश्चादयोऽग्निजे धूम
नेयावनत्रुक्तगात्रसंकोचनादिकृत उत्पातेसुविवर्णत्वविस्मयोत्कम्पितादयः गजेऽपलायनोत्कम्पत्रासपृष्ठेक्षणादयः
अरिजेवर्मशस्त्रादिग्रहापसरणादिकृत जाड्यमप्रतिपत्तिः स्यादिष्टानिष्टाकृतीक्षणैः विहाराद्यैश्च तन्मोहात्स्यादावस्था
परोपिव अत्रानिमिषतातूष्णींभावविस्मरणादयः सौभाग्यरूपतारुण्यहेतलनैर्गर्वउच्यते अत्र मोत्तरदानं वाक्यं हेलावा
मवादादयितोः सोपेक्षानिह्वोत्तरस्यश्च गोप्यवालोदयः इष्टानवाप्तिरब्धकार्यासिद्धिविषाद्भिनः अपरादायनोपिस्याद
वत्तापोविषण्णता अत्रोपायसहायानुसिद्धेश्चिन्ताश्वरोदनम् विलापश्वाससन्तैवर्ण्यमुखशोषादयोपिव कालाक्षमा
त्वमौत्सुक्यमिष्टदानिस्पृहादिभिः मनःक्षेपास्तत्वराचिन्तानाश्वासास्थिरतादिकृत २ चिन्तासम्पत्तिसर्गरुक्रमादिभिः

वा॰
प्र॰
५२

श्चित्तमीलनं निद्रा तत्रो जृम्भाङ्गभङ्गजाड्यश्वासाक्षिमीलनादिकृत् ग्रहावेशाद्वैषम्याद्धातूनां चित्तविप्लवः अपस्मारो
भूपातवेपथुधावनास्फोटनप्रभ्रमाः श्रमाः कम्पफेनस्रुतिर्बाहुक्षेपविक्रोशनादयः सुप्तं निद्रामुपेतस्य विषयानुभवस्तु
यः इन्द्रियोपरतिः श्वासनेत्रनिमीलनादिकृत् अविद्यामोहनिद्रार्थं संबोधः प्रबोधिता अंगमर्दस्मितानोवायोवि-
श्वोदयप्रभृतयः अशेषक्लेशविश्रान्तिस्वरूपावगमादिकृत् बोधो मोहक्षयाक्षेपशयनसंशीलमैत्र्यैः हृद्यन्मोतन
नोमाचयथोन्मीलनादिकृद्भवेत् प्रतिमनादिभिर्निद्राद्येसाह्वायस्ततयाभवेत् तत्रावमर्दनेशय्यामोक्षाङ्गवलना-
दयः अधिक्षेपावमानादेः स्यादमर्षोसहिष्णुता तत्र स्वेदशिरःकम्पो विवर्णत्वविचिन्तने उपायान्वेषणाक्रोशवैरस्यो-
त्तेजनादयः अवहित्थाकारगुप्तिर्भवेद्भावेन केनचित् अत्रोगादेः परोक्षस्य स्थानस्यापरिग्रहणे अन्यत्रेक्षाक्षयथावेष्टावा-
ग्भिताङ्गिकाः क्रियाः अपराधाक्षेपादिजातं चण्डत्वमुग्रता वधबन्धशिरःकम्पभर्त्सनाताडनादिकृत् शास्त्रादी-
नां विचारेणार्थनिर्धारणं मतिः अत्र कर्त्तव्यकारणं संशयभ्रमयोश्छिदा उपदेशः शिष्याणामूहापोहादयोपि च दो-
षोद्रेकवियोगाद्यैर्व्याधयो ये ज्वरादयः इहतत्सम्भवो भावो व्याधिरित्यभिधीयते अत्र स्रस्ताङ्गताक्षेपश्वासोत्कम्पनक्रिया-
दयः उन्मादो ह्लुतभ्रमः प्रोक्तो ग्रहाद्धिराद्याद्विजः अत्राट्टहासो नर्तनं गीतं व्यर्थचेष्टितं प्रलापधावनक्रोशविपरीतक्रि-
यादयः विषाद्व्याधिमन्त्रास्त्रसंप्रहारक्रमादिभिः प्राणत्यागो मृतिस्तस्यामव्यक्ताकारभाषणं विवर्णगात्रताश्वास-
मांद्यहिक्कादयः क्रियाः पार्थिवस्यालम्भरोमावकम्पस्तम्भभ्रमादिकृत् विमर्शात्संशयादेश्च वितर्कस्त्वयमुच्यते एष-
भ्रूक्षेपणशिरोङ्गुलिसंचालनादिकृत् त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः अमी संतोपि रसपोषकाश्चित्तवृत्तिविशे-

सद्रूपभावापत्तेस्तामेवानुभावसद्रूपानुप्रवेशात्तत्रयस्याख्यानात्स्तनत्वयभिशान्तमेतेषाननत्वपरेषाममभावात् तथा
चोक्तं शरीरेन्द्रियवर्गस्य विकाराणां विधायकाः भावा विभावजनिताश्चित्तवृत्तयईरिताः मानस्यौद्वेगदम्भेर्ष्यावि
वेकानिर्णयस्तथा क्लैब्येतमावज्ञानक मुक्तेद्वाविनयोपिच संशयोर्थापत्तिसिद्ध्याद्याभावायेस्युः परेपिच उक्तेषु
तर्भवेत्स्वेतेनपृथक्केनदर्शिताः तथाहि असूयायांहिमात्सर्यंरामपुद्वेगएवच दम्भस्तथावहित्थायामीर्ष्यामर्षे
मतावुभौ विवेकोनिर्णयश्चैवनिर्देशैः क्लैब्येतमायतौ औत्सुक्येकौतुकोत्कण्ठेविनयश्चतथामतौ संशयोनर्भवेत्
केतथ्यार्थापत्तिश्चापले पर्याप्तौचारिभावानांमध्येकस्यचनकस्यचित् विभावाश्चानुभावाश्चभवेदञ्चपरस्परं निर्वेदस्तथा
धृष्णीयाभवेदत्रविभावता असूयायांपुनस्तस्यांत्वक्रमेवानुभावता औत्सुक्यंप्रतिचिन्तायाकथिताचानुभावता ।
द्वौप्रतिविभावत्वमेवेत्याघेरप्यमी पर्याप्तौचमतिकाताचतथानानाक्रियानतेः कार्यकारणभावस्तुज्ञेयःप्रायेणतो
कृतः निद्रायास्तुविभावत्वंवैवर्ण्यामर्षयोर्मते असूयायांपुनस्तस्यकथितैवानुभावता प्रहारस्यविभावत्वंसंमो
हप्रलययोःप्रति मोहंप्रतिचानुभावत्वमेवेत्येयाःपरेपिच ग्लानिर्द्राश्रमालस्यमथबोधविवर्जितो संचारिणा
मिहकापिभवेद्रसानुभावता मात्वडतैर्नसम्बन्धः ॥ भावादिभिःसह स्यात्तस्यकस्याकिंतलीलानुगुण
नाकृते भ्रान्तिकेमतिनिर्वेदधृतीनांस्मृतिहर्षयोः बोधस्येप्येसस्मीनोक्ताविद्रुतिविभावनेति तथाचभरतेपि
रतिर्हासश्चशोकश्चक्रोधोत्साहौभयंतथा जुगुप्साविस्मयश्चेतिनिर्वेदग्लानिरेवच शङ्कासूयामदश्रमाआल
स्यंदैन्यमेवच चिन्तामोहौस्मृतिर्धृतीव्रीडाचपलतातथा आवेगोहर्षजडतेविषादोगर्वएवच औत्सुक्यंचतत् ।

वा· नोत्विद्रानथापस्माराएवच सुप्तंप्रबोधोयोमर्षश्चाप्यवहित्थमथोग्रता मतिर्व्याधिस्तथोन्मादस्तथामरणमे
प्र· वच त्रासश्चैववितर्कश्च स्तम्भस्वेदोदोपरं२दोनतःपरं रोमाञ्चःस्वरभेदश्च वैवर्ण्यंवेपथुस्तथा अश्रुप्रल
५८ यश्चेवमष्टौदृष्टाश्चित्तवृत्तयः अंतःकरणवृत्तीनांसात्त्विकानिप्रवर्तनैः प्रोक्ताएकोनपंचाशद्भावायोगादङ्गा·
दयः तेष्वष्टस्थायिनःपूर्वंत्रयस्त्रिंशत्ततःपरे संचारिणःपरेत्वष्टौसात्त्विकाःसंप्रकीर्तितइति अपिचात्रत्रय
स्त्रिंशदित्यपत्ननलेयत्कृते रत्यादयोप्यनियमाद्रसेष्वव्यभिचारिणः तथाहिशृंगारेतुक्रियमानतयाव
स्थितास्थायिशब्दवाच्यारतिर्यदासपुनः पुनहृस्पृश्यमानाव्यभिचारित्ववेलक्षण्यंतमितिप्राग्रसव्यभिवा
रत्वेलक्षणयोगात् तथावस्थायिनामेवरसांतरेषुसंचारिताशृंगारवीरयोर्हासोवीरक्रोधस्तथामतः शृं
तेत्रजुगुप्साकथितात्व्यभिचारितयापुनः इत्याद्यस्तत्रसुत्रेयत्नयेभावितबुद्धिभिः ततस्वेसंचारिणोत्तादि
ताः प्रायाव्यमंसात्त्विकलक्षणयथा परिणामंहृदोद्धाराकल्पयत्नसंभवेत्ततः देहस्यपरिणामात्से
सात्त्विकापरिकीर्तिताः सत्त्वेयद्यपिविभक्तफलाःस्फुरभयोश्रमातविर्त्तसंज्ञोभवत्यात्मोनप्रेरात्मानम
दहमं प्राणस्तुविक्रियांगच्छन्देहविक्षोभयत्यलम् तदास्तम्भादयोभावाःसंभवंतीभवेसमी वत्ता·
रिस्मादिभूतानिप्राणोनानाविधेस्तुते कदाचित्तवप्रधानःसंदेहेवर्त्ततिसर्वतःस्तम्भंभूमिसंस्थितःप्राणस्त
तोतमस्तुनताश्रयः तेजस्थःस्वेदवैवर्ण्यंप्रलयंविषदास्थितः खस्थएवकमात्मानमथपृथ्वीस्वरभेदभाक्ष्यृ
मावकम्पंवस्थानस्त्रचीणितनोतनयसौ बहिर्वन्तस्तुविक्षोभविधायिनात्ततःस्फुटम् प्रोक्तास्तुभावत्तामेषा

भावता च मनीषिभिः तथा च विशेषलक्षणे स्तम्भो हर्षभयाश्चर्यविषादामर्षसंभवः तत्र वागादिराहित्यो
नैश्चल्यशून्यतादयः स्वेदो हर्षभयक्रोधादिजः क्लेदकस्तनौ रोमाञ्चोयंकिलाश्चर्यहर्षोत्साहभयादिजः
रोम्णामभ्युद्गमस्तत्र गात्रसंस्पर्शनादयः विषादविस्मयामर्षहर्षभीत्यादिसंभवं वैस्वर्यं स्वरभेदः स्यादेष
गद्गदतादिकृत् वित्रासामर्षहर्षाद्यैर्वेपथुर्गात्रलौल्यकृत् विषादरोषभीत्यादेर्वैवर्ण्यं वर्णविक्रिया भा-
वज्ञैरत्र मालिन्यकार्श्याद्याः परिकीर्तिताः हर्षरोषविषादाद्यैरश्रु नेत्रजलादयः हर्षजेश्रुणि शीतत्वमौ-
-रोषादिसंभवे सर्वत्र नयनक्षोभरागसंमार्जनादयः प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः तत्रानु-
भावाः कथिता महीनिपतनादय इति अत्र सत्त्वमतीव रजस्तमोभ्यामस्पृष्टे चित्ते सत्त्वमिहोच्यते निर्हेतत्वयोत्पत्ते-
र्योगात्संभवन्तीति सात्त्विका इति अथ च सत्स्वपि कोनपेवाशनेरेव भावानोत्तेस्विन्नहनिविशेषतेस्तम्भादीनेपु-
नः समाहितत्वस्थितैरेव रसैरभिनेयतामुख्यत्वेन सात्त्विकताव्यपदेशः तथा च भरते सत्त्वे चान्तर्गतः स्थायिभावाः सं-
चारिणस्तथा चित्तस्य परिणामाः सान्द्राः सात्त्वात्स्तम्भादयः पुनः परिणामे स्वदेहाश्रयाकस्मात्संभवन्त्यतः देहस्य प-
रिणामास्ते सात्त्विकाः स्वकीर्तिताः यद्यपि कर्त्तुं शक्यन्ते नैर्विदितमर्मभिः भ्रूविक्षेपकटाक्षाद्याः सर्वे स्वेदादयः
पुनः समाहितान्तःकरणैरेवाभिनयगोचराः तस्मात्सत्त्वैकनिष्पन्नाः स्तम्भाद्याः सात्त्विका मताः स्तम्भस्वेदादि-
भिर्गम्यायाः काश्चिच्चित्तवृत्तयः तासु स्तम्भादयः शब्दा वर्त्तन्ते लक्षणाबलात् तेन भावत्वमप्येषां मुख्यं हि नैव विशु-
ज्यते इति रसादेरनुदर्शनादेतेषामनुभावतापि तथा च दर्पणे उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन् लोके

वा॰ श्रं॰ ५२
५१

यः कार्यरूपः सोनुभावः काव्यनाट्ययोः उक्ताः स्त्रीणामलंकारा अंगजाश्च स्वभावजाः तद्रूपाः सात्त्विका भावास्त-
थाचेष्टाः परा अपि एवं रसाष्टकस्य स्थायिव्यभिचार्यादिभावो ह्युक्तनायिनाशान्ताख्यनवमेरसेतल्लक्षयंति निर्वेदस्य
मंगलप्रायस्य प्रथममनुपादेयत्वेपि उपादाने व्यभिचारित्वेपि स्थायितामभिधानार्थं तेन निर्वेदस्य स्थायिभावोस्ति
शान्तोपि नवमो रसः निर्वेदस्य विषयवैराग्यात्मकत्वेन शृंगारादावमंगलत्वेनेति भावः यथा उत्साहादेः स्थायिनो
पि हासादौ व्यभिचारित्वे तथा व्यभिचारिणोपि निर्वेदस्य शान्ते स्थायित्वमिति तात्पर्यं तथा चोक्तं स्थायी स्या-
द्विषयेष्वेव तत्त्वज्ञानोद्भवो यदि इष्टानिष्टवियोगाप्तिकृतस्तु व्यभिचार्यसाविति तस्मात्सिद्धमेतत् तत्त्वज्ञानजो
निर्वेदः शान्तरसस्य स्थायी कारणं तदजन्यस्तु रसान्तरे व्यभिचारीत्यतितश्च शान्तरसः निर्वेदस्थायितां प्राप्तः
शान्तोस्ति नवमो रसः अनित्यतादिनाशेषवस्तुनिःसारतातद्याः परमार्थस्वरूपं वा तत्त्वज्ञानमिष्यते पु-
ण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः महापुरुषसंगाद्यास्तस्योद्दीपनकारिणः रोमांचाद्यास्त्वनुभावाः ॥ ॐन
स्तथास्युर्व्यभिचारिणः निर्वेदहर्षस्मरणमतिभूतदयादयः एतदेवोदाहरन्ति यथा अहौ वा हारे वा कुसुमा-
मयने वा दृषदि वा मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः
कदारण्ये पुण्ये शिव शिव शिवेति प्रलपतः अत्र कस्यचिदुपशान्तस्य महापुरुषस्यानित्यतापरिभावितेन जगदा-
लम्बनात्तत्त्वज्ञानो निर्वेदः पुण्यारण्याद्युद्दीपितः सर्पहारादिभिरनुभावितः वककर्वीगानस्मितैर्धृतिमतिहर्षाद्यैः
संचारितः सहृदयेषु शमस्थायितया स्वद्यते यथासान्तोनवनमेवनायिकत्वेनवासूतनेति तथानुपदमेवाग्रिहष्यं

५२

ते एवमलक्ष्यक्रमं रसं तन्नयिना भावादींल्लक्षयति रतिर्देवादिविषया व्यभिचारी तथाञ्जितः भावः प्रोक्तः आदिश
ब्दान्मुनिगुरुनृपपुत्रादिविषया कान्ताविषया तु व्यक्ता शृङ्गारः येन प्रकारेण कान्ताविषया रतिर्विभावा
नुभावव्यभिचारिभिरभिव्यक्ता शृङ्गाररसउक्तः तेनैव प्रकारेण देवादिविषया रतिर्विभावाद्यैः प्राधान्येनाभिव्यक्ता
शृङ्गाररसउक्तः तेनैव प्रकारेण देवादिविषया रतिर्भावाद्यैरञ्जिता प्राधान्येनाभिव्यक्ता भावसंज्ञयोक्ता एवं व्यभि
चारिभावश्च विभावाद्यैरभिव्यक्तो भावसंज्ञः तत्र व्यत्ययः हन्तावादिशब्दादेरयमभिप्रायः प्रेयोवत्सलसख्येनेति या
यिकारसभेदा उक्ताः प्राच्यैः ते भावसंज्ञयैव गतार्था ज्ञेया इति तथा चैतेषां लक्षणानि ग्रन्थान्तरेषु अथ भेदत्रयी
रूपया स्नेहः प्रीत्यादि निगद्यते गाढानुरक्तिस्तत्रान्त्यं सममतेन सदाश्रिता क्रमभक्तेषु तु ग्राह्यस्मादिवज्ज्ञेयश्चानुक्रमात्
त्रिविधे पुत्रये प्रीतिः सख्ये वत्सलता हि सा ... प्रीतिः समस्ता इदं तिर्यग्नूनास्वत्रग्राह्या हरेर्मताः आराध्यत्वात्मि
कानेषां रतिः प्रीतिरित्येवोरिता अस्याप्येव भक्तिसंज्ञायेन्तत्वात् अनुकम्पा तेन सदायाः सतामताः साम्याद्धि सख्य
तेषां रतिः सा तु सखित्वोच्यते गुरवो ये हरेरस्य तेषु रत्या रतिर्विकृतेः अनुग्रहमयी तेषां रतिर्वात्सल्यमुच्यते इत्यादि
रसास्तु न सिद्धौ रसाश्चोच्यः एतदेव क्रमेणोदाहरति क्रमेणोदा कण्ठकोणविनिविष्टमीश ते कालकूटमपि मे महा
मृतं अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि रोचते न मे अत्र भक्तस्य महादेवमालम्ब्योत्पन्ना रतिरीशानेत्यादीपन्त्वं
स्वेतिरूपेणानुभावेन प्रकटीकृता ईशानस्मादृत्यादिभिर्हिमाद्यात्म्यादिभिः संचारिभिः पुष्टिं नीता रसिकाखु
भावसंज्ञया सदते सति चाप्रशान्तरसे भावस्यैव प्राधान्येन निर्देशः तथा चोक्तं संचारिणः प्रधानानि देवादिविषया

वा॰ रतिः उद्बुध्यमात्रस्स्थायीभावो रसोऽभिधीयते अस्यार्थः विभावानुभावव्यभिचारिभिः सत्यपि संयोगे यत्र प्राधान्येन रति
प्र॰ देवताद्येत्यचमत्कारिणी तत्र भावसंज्ञा तथा चैतदेवाभिप्रेत्योक्तं सवैवणायतेऽपि क्वचिद्देशास्तते चेत्ता मृणालमिव क
भ॰ सेवप्रमसकग्रहे रसादिपर्यालोचनयैव व्यभिचारिप्राधान्येऽपि विशेषं मुनिविषयमुदाहरति हरत्तिरेसप्रतिदेव
रेष्यतः शुभसपूर्वाचरितैः कृतं शुभैः शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम् अत्र वक्तृ मुनि
50 मालम्ब्य संजाता रतिरयं हरणादिना दीपिता स्वोत्तरूपेणानुभावेन प्रकटीकृता मुनिमाहात्म्यादिभिर्व्यभिचारिभिर्वा
दिभिः पोषिता भावसंज्ञया चमत्कारोति अत्र मुनिमालम्ब्योत्पन्ना रतिः स्थायिभावो विभावादिसंयोगादृश्योऽभूयव
त्सत्वरसत्तां प्राप्नोति भरतसम्मतस्फुरो ग्रथाग्रंथकृता भावशब्देनोक्तं रतिप्रपंचः एवमन्यदुदाहार्यं एवं रतेर्भावा
नामुदाहृत्य व्यभिचारिणमुदाहरति व्यभिचारी यथा जानेकोपपराङ्मुखीं प्रियतमा स्वप्नेऽद्य दृष्टा मया मा मां सं
स्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता ततः नो यावत्परिरभ्यचाटुकशतैराश्वासयामि प्रियां भ्रातस्तावदहं शठेन वि
धिना निद्रादरिद्रीकृतः अत्र विधिं प्रत्यसूया अत्र नायिकामालम्ब्योत्पन्ना रतिः कोपेनोद्दीपिता परिरम्भणवा
टुकशतेन चानुभावि ताविधिं प्रति शठपदव्यञ्जनया सूचनया संचारिता वा भिलषितस्य तदाश्वासनस्यानविग।
माहिब्रलम्भरसत्वेऽभावानिनापिषानकाविसमशेव विडम्बवविधिं प्रत्यसूयायामुत्कटत्वाज्जावसंज्ञा एष एवञ्च र
सभावयोः प्राधान्याप्राधान्यकृतो भेदः तदुक्तं यथा मरिचखण्डादेरेकीभावे पानके उद्रेकः कस्यचित्क्वापि
तथा संचारिणो रसे एवं भावं लक्षयित्वा तदाभासं लक्षयति तदाभासा अनौचित्यप्रवर्तिताः तदाभासाः रसाः भा

साभावाभासाः तयो रसभावयोराभासः इति समासः अनौचित्येन प्रवृत्तौ रसो रसाभासः एवं भावाभासोपि
तर्थः तत्रानौचित्यं मनोविदां उपनायकनिष्ठायां मुनिगुरुपत्नीगतायां च बहुनायकनिष्ठायां रतौ तथा
नुभयनिष्ठायां प्रतिनायकनिष्ठे तद्वदधमपात्रतिर्यगादिगते शृङ्गारेनौचित्यं रौद्रे गुर्वादिगतकोपे शा-
न्ते च हीननिष्ठे गुर्वाद्यालम्बने हास्ये ब्रह्मवधाद्युत्साहे धमपात्रगते तथा वीरे उत्तमपात्रगते भयानके ज्ञेय-
मितिरूपमनौचित्यमेव आभासाः पुनरेतेषां अस्थाने हानिर्नाभवेत् प्राप्तिस्तत्समनौचित्यमस्थानतद्विधो
दितम् विपरीतहानिरेतेषां अस्थानतन्नामितीर्यते असमस्तमयोग्यत्वमनौचित्यं द्विधा भवेत् नातिस्तत्समनौ
चित्यमस्थानतद्विधोदिते विपरीतहानिरेतेषां अस्थानतन्नामितीर्यते असमस्तमयोग्यत्वमनौचित्यं द्विधा भवे
त् अप्राणिनि भवेदाद्यं तिर्यगादिषु चान्तिमम् इति एतदेव क्रमेणोदाहरति तत्र रसाभासो यथा स्त्वमः ।
केवामालिङ्गनमपि विनायेन रसमेकविते भेकः प्राणान्त्रणमुखमन्त्रवेयं मन्त्रयसे सत्तत्कैको ज्ञातः शशि
मौवियमालिंगासि बलात्पः श्रीः कस्मैषामदननगरिस्थायामितयम् अत्रानेककामुककविषयमभिलाष
मस्याः स्तमरसादत्रागते बहुव्यापारेणालानेभ्यनक्ति भावाभासो यथा राकासयाकरस्तुवीतरस्तायाता
दोमारमेत्यावनतरंगितविभ्रमाणा तत्किंकरोमि विदयेकथमत्र मैत्रीं तत्स्वीकृतिर्व्यति कथेक श्वाभ्युपा-
यः अत्र चेतनानौचित्यप्रवृत्ता आदेशाद्याः स्मितयोगाः पश्चात्समस्तादितिः नौचित्यावित्य प्रवृत्तानन्तरकायाम
पिनायकस्य वितैसनौचित्यम् एवमन्येषूदाहार्याः अस्येहासायाभासाः शृङ्गाराभासस्य भावशान्त्यादी

सत्रादिशब्दसंघटहीनानाह । भावस्य शान्तिरुदयः संधिः शबलता तथा । तथा संलक्ष्यक्रमैवेत्यर्थः । एवंच
लक्षणमुदाहरन्निति बलदेवेन क्रमेणोदाहरति । तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राङ्कितं किं वक्षश्चर
णानतिव्यतिकरव्याजेन गोपाय्यते । इत्युक्ते क्व तदित्युदीर्य सहसा तत्सम्प्रमार्ष्टुं मया साश्लिष्टा रभसेन तत्सुखवशा
त्तन्व्या च तद्विस्मृतं । अत्र सुखविवशतानुभावेन कोपस्य प्रशमः । न चात्र कोपस्य प्रशमेन प्रसादस्योदयः इति श
ङ्कनीयं । यतोऽत्र कोपस्य प्रशमस्य पर्यवसानेन न तु प्रसादस्योदये तदनुभावनामनवलोकनात् । एवमुद
यादिष्वपि ज्ञेयम् । एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया सद्यः कोपपराङ्मुखं ग्लपितया चाटूनि
कुर्वन्नपि । आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणं मा भूत्सुप्त इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः ।
अत्रौत्सुक्यस्य । अत्र मन्दवलितग्रीवत्वानुभावेनौत्सुक्यस्योदयः न तु कोपस्य प्रशमः तदनुभावानुपादाना
त् । उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतः सत्सङ्गप्रियता च वीररभसोत्फालश्च मां कर्षतः । वैदेहीपरि
रम्भ एष च मुहुश्चैतन्यमामीलयन्नानन्दी हरिचन्दनेन्दुशिशिरस्निग्धो रुणद्ध्यन्यतः । अत्रावेगहर्षयोः । अत्र पूर्वा
र्धे वेगस्य उत्तरार्धे हर्षस्य । अत्र द्वयोस्तुल्यबलत्वेन संधिः । क्वाकार्यं शशलक्ष्मणः क्व च कुलं भू
योऽपि दृश्येत सा दोषाणां प्रशमाय मे श्रुतमहो कोपेऽपि कान्तं मुखं । किं वक्ष्यन्त्यपकल्मषाः कृतधियः स्वप्नेऽपि सा
दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति । अत्र वितर्कौत्सुक्यमतिस्मृतिशङ्कादैन्यधृतिचि
न्तानां शबलता । क्वाकार्यं शशलक्ष्मणः क्व च कुलमित्यत्र स्मृतिरूपाविचिन्त्यार्थो वितर्क इति कथ्यते स चेदे

यथाश्रमणीभूतोपिब्राह्मणः प्राक्वृत्तितयाब्राह्मणजातिमेवाहूयते तथावयंगमनेनानेकार्थत्वंप्राप्तोपि
यमादिरनेकार्थोनेकार्थत्वेनैवव्यपदिश्यते इत्यर्थः शब्दस्यवस्तुव्यंजकतामाह वस्तुमात्रेणयथाः पंथि अ
णएत्थसत्थरमत्थिमणंपत्थरत्थलेगामे उण्णअपओहरंपेक्खिऊणजइवससिताववससु अत्रयद्युपभोगक्ष
मोसितदास्स्वेतिव्यज्यते अत्रस्वयंदूत्यार्थैः शब्दैः संभोगोपयोग्यार्थाभिप्रायंप्रकाशयति पथिकनात्रस्रस्त
रमस्तिमनाक्प्रस्तरस्थलेग्रामे उन्नमतः पयोधरान्प्रेक्ष्ययदिवससितदावसेतिस्फुटः प्रकाशार्थः गोप्या
र्थस्तुपथिकनेहस्रस्तरःशास्त्रमस्तिमनाक् प्रस्तरः उन्नतपयोधरंप्रेक्ष्यस्थलेपूर्वविबद्धेनेनन्नविदग्धानिवासे
नगरे उन्नमतः प्रादुर्भवतः पयोधरान्स्तनानेत्यपयदिवसासितदावसेति गोप्यार्थेनशास्त्राभावादेवाकारेङ्गितः ता।
तानानर्थयिष्टिनेस्मिग्रामेएवंविधयेवादीपनेमेवेसमस्तमलाकामिनींदृष्ट्वाकोनामोपभोगक्षमोन्यत्रयातीति
वस्तुरूपिण्यायात्मकंवस्तुनेकार्थशब्दोपादानात्इत्यर्थः तथावाश्रीनाम्नकालकरवेलेतिवत् इत्यर्थ
स्यवाक्यद्वयस्यप्रकृताप्रकृतस्यासम्बंधस्यसम्बंधायावगमाद्योपमालंकारएवात्रापिकल्प्यते इतिवाक्यं अत्र।
हिगोप्यगोपकभावेनद्वयोरर्थयोः सम्बंधयत्नमेवातः क्वोपमाकल्पनावकाशइति शनिरशनिश्चतमुच्चैर्नि
हंतिकुप्यसिनरेन्द्रयस्मैत्वम् यत्रप्रसीदसिपुनःसभात्युदारोनुदारश्च अत्रविरुद्धावपितदनुवर्तनार्थमे
केकार्यंकुरुतइतिध्वन्यते अत्रशनिरशनिरितिवावपिविरुद्धौतदनुवर्तनार्थमेकंकार्यंहननक्रियाकरूपंकुरुतः
तथोदारानुदारावपिविरुद्धौभवनक्रियामेकंकार्यंकुरुतः एवंशब्दशक्त्युद्भवमभिधायार्थशक्त्युद्भवमा

टी॰ अर्थशक्त्युद्भवोप्यर्थो व्यंजकः सम्भवी स्वतः प्रौढोक्तिमात्रात्सिद्धो वा कवेस्तेनोम्भितस्य वा वस्तु वालंकृति
का॰ र्वेति षड्भेदोसौ व्यनक्ति यत् वस्त्वलंकारमथवा तेनायं द्वादशात्मकः तत्र स्वतः सम्भवीति केवलं भणितिमा-
प॰ त्रनिष्पन्नो यावद्बहिरप्यौचित्येन सम्भाव्यमानः कविना प्रतिभामात्रेण बहिरसन्नपि निर्मितः कविनिबद्ध
52 निबद्धवक्त्रेति द्विविधोपर इति त्रिविधः वस्तु वालंकारो वेति षो
ढा व्यंजकः तस्य च वस्तु वालंकारो वा व्यंग्य इति द्वादश भेदा अर्थशक्त्युद्भवध्वनेः अर्थो यत्र व्यंजकः सोर्थ
शक्त्युद्भवः स व्यंजकोर्थः स्वतः सम्भवी कवेः प्रौढोक्तिमात्रात्सिद्धो वा सत्स्वपि बहिरसम्भवे केवलं कवेश्च
मत्कारात्वगुणैर्वचनैर्वा केवलोसिद्ध इति त्रिविधः कविनिबद्धस्य नायकस्योक्तिः कव्युक्तेरधिकं सत्वाभा
गमेत्यतोपि केतस्तनयोरन्योन्यभेदः त्रिविधोपि पुनः स्वतः सिद्धो व्यंजकोर्थो वस्तुरूपोलंकाररूपश्चेति द्विधा एवं वा विप्रौ
ढोक्तिसिद्धोपि वस्त्वलंकाररूपाभ्यां द्विधेति षड्भेदः स व्यंजकोर्थो यद्वस्तु व्यनक्त्यलंकारं वेति द्वादशभेदाः स्वतः
सम्भविना वस्तुना व्यंजकतामाह क्रमेणोदा॰ अलसशिरोमणिद्धुत्ताणं अग्गिमो पुत्ति धणसमिद्धिमओ इअभ
णिएण णअंगी अप्फुल्लविलोअणा जाआ अत्र ममैवोपभोग्य इति वस्तुना वस्तु व्यज्यते अलसशिरोमणिर्धूर्तानामग्रि-
मः पुत्रि धनसमृद्धिमयः इति भणितेन नताङ्गी प्रफुल्लविलोचना जाता अत्र स्वतः सम्भविना लोकप्रसिद्धेन
फुल्लविलोचनत्वरूपेण वस्तुभूतेनार्थेनालंकाररूपेण ममैवोपभोग्य इति वस्तु व्यज्यते तथा वा तस्यैतेनाप्रवा-
सितं पृष्टेनावेदयते यत सम्पद्याशावाविनमिति वस्तुनार्थेनार्थो व्यज्यते स्वतः सम्भविना वस्तुनालंकारो व्यज्यते

त्रानजरठोर्जितगर्जितेन कठिनातिबलवत्सिंहनादेन सकलेष्वरण्येयत्रक्वापि सर्वस्मिन्संग्रामेविजयान्तः
ज्वलितेनातिपूर्णःप्रतापः धाराजलैः खड्ग-धाराकान्तिभिर्निर्वापितोलोपितः इत्येकोर्थः द्वितीयस्तु कालकरः
पूर्णामकान्तिश्यामोबालतरुणश्यामोमहानम्बुवाहोमेघस्तस्मात्तामुत्कर्षमाकाशपथेनदेवनामेघानांप्रवर्त्तकेन
शक्रेणोर्जितस्तनितेन सकलैकलकलसहितेनतेजसांप्रतापः प्रकृष्टस्तापोनिर्वापितः शीतलीकृतः अत्रा
प्रस्तुतस्यराज्ञोवर्णनेद्वितीयार्थस्यविवक्षितस्याप्राकरणिकस्यानुपवर्णनेनसम्बद्धतयामाप्रसज्यतेति सम्बन्धावग
मायशब्दान्तरपर्यायोरुपमानोपमेयभावःकल्प्यते ततश्चात्रोपमाख्येयोर्थः नन्वात्रश्लेषएवप्रधानेकिमुपमाख्ये
येनेतिशंक्यं तथाहिययैकवृत्तस्यप्रसवस्यायत्तद्वावेवार्थौप्रकृतौ तत्रश्लेषःप्रधानं यत्रैकःप्रकृतः परो
प्रकृतः तत्रशब्दशक्तिमूलोपमालंकारध्वनिरित्यवस्था तथाचाभिमतएवालंकारःशब्दशक्त्याप्रकाश्यते
यस्मिन्नर्थस्तुकःशब्देनशक्तिशब्दद्वयोर्हिसमस्तविहितमलोवनर्कता यत्रशब्दशक्त्यासाक्षादलंकारान्तरंवाच्यं
सत्प्रतिभासतेससर्वःश्लेषः यत्रतुशब्दशक्त्याःसामर्थ्यादाक्षिप्तंवाच्यव्यतिरिक्तंव्यंग्यमेवालंकारान्तरंप्रकाशतेस
ध्वनेर्विषयःयत्राभिधायाएकत्रनियमहेतुः प्राकरणादिर्विद्यते ततोद्वितीयस्मिन्नर्थेभिधानसंक्रामति ता
त्रद्वितीयोर्थोमावाविर्भूतःसध्वन्यते उदाहृतश्चालंकारध्वनिः अत्रान्तरे कुसुमसमययुगमुपसंहरन्नजृम्भित
ग्रीष्माभिधानः फुल्लमल्लिकाट्टहासोमहाकालःइत्यादि नन्वात्रकालकरवालएवमहाम्बुवाहइत्यारोपेणैवसि
द्धेकिंश्लेषकल्पनयेतिवाच्यं तथासतिवाच्यान्तेवस्यात्तद्व्यंग्यता अपिचव्यंग्यरूपकेवाच्यासिद्ध्यङ्ग-गुणीभू

का॰ तत्त्वंयत्तैवस्यात्तत्रशब्दशक्त्युद्भवालंकारध्वनिता तथात्रैयमहेतुर्विरोधं विनाचेद्भेदमेवतत्त्वोपेनसिध्यति सा
टी॰ यर्मस्याविवरणात् तथाचवाच्यसिद्ध्यङ्गत्वाप्रसंगः तिरस्कृतविप्रलापोविधुरतिशोकहिमोमधुरतीतः
५३ मतिमाननत्रहन्तिः प्रतिपदपलाग्रणीविभातिभवान् अत्रैकपदस्य द्विरूपपदत्वे विरोधाभासः विधुरतरेण
वैरिगणेननिशात्ययमन्नतन अत्रसंपरायपदेनैकोऽर्थः प्रकृतः सम्भरापदेनद्वितीयोऽर्थोऽप्रकृतार्थः तत्र
तयोः सम्बद्धार्थतावारणाय विरोधाभासस्य चमत्कारितेन शब्दशक्त्याध्वनते विशेषणविशेष्ययोः तत्तास्त्रुवेत्तोद्वितीय
धाभासेनवाव्यपवर्तमानः इतिकेचिद्विरुद्धकान्तिकाकावारणायामभंगपदमेवोदाहरति अमितःसमितःप्राप्तैरु
त्कर्षैर्हर्षदप्रभो अहितःसहितःसाधुयशोभिरसतामसि अत्रापिविरोधाभासः अमितःअविद्यमानामितमा
नेयस्यासन्नाहरूपाअपरिमितायास्त्वर्थः एवंविधायाः समितःसंग्रामात्प्राप्तैरुत्कर्षैर्वीर्यातिशयैर्हर्षदहेप्र
भोसाधुयशोभिःसहितोहितासहितोऽसीति प्रकृतार्थस्यवर्णने अमितःअपरिमितःसमितःपरिमितःअ
तिहितायार्थे विरोधस्यासम्बन्धः तद्वारणाय शब्दशक्त्याचचमत्कारिकोविरोधाभासोऽलंकारोव्यज्यते विरो
धवाचकस्योपादाने विरोधाभासोऽलंकार अपिशब्दादेर्विरोधवाचकस्योपादानेविरोधाभासस्यवाच्यत्वे अ
लंपदेनतत्कंपतेतिपरमार्थः निरुपादानसम्भारमभित्तावेवतन्वते जगच्चित्रंनमस्तस्मैकलाश्लाघ्यायश
